प्रवेश सं० ४८८८८९ विषय: वेद: क्रम सं० २५४

नाम ~~कात्यायनश्रौतसूत्रम्~~ (चतुर्थोध्यायः) आपस्तम्ब ग्रन्थकार श्रीदेवयाज्ञिक.

पत्र सं० ~~१-१७२~~, १-९, ~~६~~-१०, १२-३६, ~~३८-१७३~~ ३८-१४०, ~~१४२-१४३, १७२~~ १४२-१४९

म.छि. १०९-१७३ (१७०कु ग.)

श्लोक सं०

अक्षर सं० (पङ्क्ती) ३०. पंक्ति सं० (पृष्ठे) ८.

आकार: ~~१०" x ४६"~~ 

सं. १५५४ लिपि: दे.ना. आधार: का.

वि० विवरणम् पू०

अत्र १४९ आरम्भे पत्रं

पी० एस० यू० पी०--७७ एस० सी० ई०--~~२५४--५०,०००~~ द्विवेदी प्रभु

001861 आ. ७७१३.

Indira Gandhi National Centre for the Arts

देवताख्यपुस्तक

[illegible]

[illegible]

Indira Gandhi National
Centre for the Arts

श्री॰ ॥श्रीगणेशायनमः॥ॐ॥ऋतिक्रमानुसारेणावार्थे॥प्रथमंपौर्णमास
२ मनुविहितं।अधुनादर्शेष्ट्यनुविधानंकरिष्यन्ततःप्राक्कालीनंपितृयज्ञ उ॰ १२
मनुविधाति॥ ॥अपराह्णेपिंडपितृयज्ञश्चंद्रादर्शनेमावास्यायामिति
॥अह्नोदिवसस्यसमंद्वेधाविभक्तस्यापरोद्वितीयोभागोपराह्णः।शद्वसा
मर्थ्यात्।समंत्रेधाविभक्तस्याह्नस्तृतीयोभागोपराह्णइत्यपरे।तत्तुतः
सवाअपराह्णेददातीतिप्रकृत्यपूर्वाह्णोवैदेवानांमध्यंदिनोमनुष्या
णामपराह्णःपितॄणामित्यर्थवादेपूर्वाह्णमध्याह्नापराह्णानांत्रया
णांदिवसभागानामभिधानात्।अह्नःपूर्वोभागःपूर्वाह्णः॥दिनस्यम

ध्यंमध्यंदिनः।अह्नोपरोभागःअपराह्णइति।पूर्वापराध[illegible]रमेकदे
शिनेकाधिकरणेइतिसमासः।राजाहःसखिभ्यष्टजितिअह्नशब्दात्तद्
ध।अह्नोह्नएतेभ्यइत्यह्नादेशः।अह्नादंतादितिणत्वं॥पिंडपितृयज्ञ
इति[illegible]वक्ष्यमाणस्यकर्मणःसं
ज्ञा।साचपिंडदानस्यैवार्थानुगमात्॥पिंडैःपितॄणांयज्ञःपिंडपितृय ८४
ज्ञइति।अतश्चहोमजपादयस्तदंगाःप्रधानेनचिंतायाः॥पिंडदानस्याकर
णेअभ्यावृत्तिर्नहोमादेः।अमावास्यायामपराह्णेचंद्रादर्शनेपिंडपितृ
यज्ञोभवतीत्यन्वयः॥तत्रामावास्यायामपराह्णेपिंडपितृयज्ञइत्येतावत्युक्ते

Indira Gandhi National
Centre for the Arts

श्री०

२

अमावास्याशब्दस्यअमावस्यायाममावास्यायायजेतायएवंविद्वानमा
वास्यायजतइत्यादौकर्मणयपिदर्शनात्कर्मसंबंधेनैवपिंडपितृयज्ञोवि
हितःस्यात् । कर्मणा एवंश्रुतत्वात्रामावास्यातिथिलक्षणकालसंबं
धेन । भवत्वेवंकोदोषइतिचेत् । मैवं । तथासतिदाक्षायणयज्ञस्यकौ
ड्याधिनामयनेसारस्वतसत्रादौप[illegible]अमावास्यपिंडपितृयज्ञप्र
सेः अतस्तद्व्यावृत्त्यर्थंचंद्रादर्शनइतिविशेषणं । चंद्रस्यादर्शनंचंद्राद
र्शनं । तच्चाभ्रादिनाद्वीपांतरवर्त्तित्वादिनापिभवति । तेनतच्चंद्रादर्श राम०
नममावास्यापदेनविशेषयति । चंद्रादर्शनशब्देनात्रचंद्रमसःपरमः १

क्षयोलक्ष्यते । नक्षयमात्रं । तस्यप्रतिदिनंसद्भावात् । कुतएतदवसित
मितिचेत् ॥ तस्मिन्नक्षीणेददातीत्युपक्रम्ययदैवनपु रस्तान्नपश्चा द
द्दृशेथेभ्योददाती । तिश्रुतेः । अतोमावास्यायांतिथावपराह्नेचंद्रस्याप
रमक्षयविशिष्टएवकालेपिंडपितृयज्ञोभवतीतिसूत्रार्थः । तेनदाक्षा
यणादौप [illegible]अमावस्यानुष्ठानेपिंडपितृयज्ञस्यनिमित्तभूत
कालाभावादननुष्ठानंसिद्धं । कालक्षोप्यविधिमुपदिशति ॥ ॥द
क्षिणाग्नौश्रपणं ॥ अत्रपितृयज्ञेदक्षिणाग्नावेवः श्रपणंभवति
गार्हपत्याहवनीयापवादोयं । शाखांतरात् ॥ ॥होमश्च । दक्षिणाग्ना

तू२

Indira Gandhi National
Centre for the Arts

वित्यनुवर्त्ततेमेक्षणेनतुहोतव्यमयइतिसोमायेतिवेतिवक्ष्यमाणोहोमोपि
३ दक्षिणाग्नावेवभवति।आहवनीयेहोमइत्यस्यापवादः॥ ॥परिस्तीर्यत
पूर्ववत्पात्रासादनमेकशः।तंदक्षिणाग्निंदर्भैःपरिस्तीर्यपूर्ववत्पात्रासा
मर्थ्यात्पात्राणामासादनंभवतिपूर्ववदित्यनेनअपणस्यपश्चादुत्तरतोवा
अर्थवच्छेत्पतावदतिदिश्यते।हि।इत्येतदपिप्राप्नोतितत्रिवृत्यर्थमेक
शइति।एकशःएकैकंपात्रमासादयति नद्वंद्वान्यावापयोगक्रमेणद
क्षिणाग्नेरुत्तरतोदक्षिणसंस्थाःस्थ्यः।शूर्पं।अग्निहोत्रहवणीवा।चरुस्था
लीवा।कृष्णाजिनं।शम्यातरान्ता।उलूखलं।मुसलं।त्रीदृषः।अकृषिवदण २

च्या

पत्ने।अत्रचरुस्थालीवरुणपणर्यमुदके।आज्यामेक्षणं।समित्रयं।इद
पात्रेस कृदाच्छिन्नानिदर्भतृणानि।सूत्रादीनामन्यतमदिति।ननुपरिस्त
रणस्याद्भितमात्रेणगत्वादत्रापितत् प्राप्नोत्येवकिमर्थंपुनरुच्यतेपरिस्ती
र्येति।सत्यं।नत्तुहोमात्पूर्वकालेप्राप्नोति।नास्मिन्काल इति।तेनकाल
विशेषविधानार्थंपुनर्वचनं।येषांतुनाङ्गत्वंगतेषामप्राप्तस्यविधाना
र्थं।एतच्चपरिस्तरणंहोमांगत्वाद्धोमस्ययज्ञोपवीतिनाकरणपक्षेइद
मपियज्ञोपवीतिनैवप्रागुदग्भिर्दर्भैःप्रागग्रैःउदगग्रैःदक्षसंस्थंप्राक्संस्थेनका
र्यं।प्राचीनावीतिनाहोमकरणपक्षेपरिस्तरणमपितथैवकार्यं।अत्रसर्वक

नावी१

Indira Gandhi National
Centre for the Arts

ब्र॰ मोपसव्येन दक्षिणामुखेन कर्त्तव्यं ।अग्रेनी ।विक्षिप्य सनु विधाना त्यथमसुव
४ नीवीवंधनकार्यं ।ततः परिस्तरणादि ।आपस्तंवः ।दक्षिणाग्रान्दर्भैर्द
क्षिणमग्निं परिस्तीर्य दक्षिणतः पश्चाद्वा दर्भान्संस्तीर्य दक्षिणाग्रानेकै
कशः पिंडपितृयज्ञपात्राणि प्रयुनक्ति स्फ्यं मेक्षणं कृष्णाजिनमुलूखलं
मुसलं शूर्पमान्यस्थालीं चरुस्थालीं पनवान्यनार्थो भवतीति ॥ ॥आ
श्वलायनो ... पि दक्षिणाग्नेः प्रागुदक्चैकैकशः पात्राणि सादयेच्चरु
स्थालीं शूर्पं स्फ्यमुलूखलमुसलं कृष्णाजिनं नक्त दाक्षित्रं ध्रमेक्षणं कमंड राम॰
लूमिति ॥ ॥अपरेण गार्हपत्यं चरुमश्रूणं कृत्वं वा तूष्णीं गृहीत्वान्तरेण ४

दक्षिणाभिमवहंतीति तिष्ठन् ॥ ॥गार्हपत्यादपरस्यां दिशि अश्रूणिं चरुं स्थालीं
तूष्णीं गृहीत्वा न सुच्चेन मुष्टिना प्राचीनावीती दक्षिणामुखो चरुं गृह्णीयात् ।
अथवा अश्रूणं कृत्वं वं गृह्णीयात् ।अतश्च विकल्पः ।चरुस्थाल्याग्रहणं कृ वि
वा ।मंत्रस्याविधानात्तूष्णीं ग्रहणं लौकिकवाग्व्यवहारणां प्रतिषेधार्थं ।आप
स्तंवसूत्रे विकल्पः ।दक्षिणतः प्राग्दीर्घा हिमजुषकं समवस्थितं भवत्यथ चरु
सूपवीती स्थालीमेकपवित्राणां तर्ह्यायतनाद्दक्षिणतः शाकलाद्विनि
र्वपति उत्तरतो वा प्राचीनावीती तां पूरयित्वा निमार्ष्टि मृन्मये निर्वपति ॥
पितृभ्यो जुष्टं निर्वपामीति वा तूष्णीं वेति ।अतश्च स्थाल्येव ग्रहणं ।मानवे

Indira Gandhi National
Centre for the Arts

उदक्यामेकपवित्रमवधाय पूरयित्वा बिले निमार्ष्टीति॥ शांखायनः॥ गा
५ र्हपत्यस्य पश्चाद्दक्षिणाग्रेषु कुशेषु स्फ्यं निधायोपविष्टा व्रीहीन्या आपु
रस्ताच्छूर्पि स्थाल्यां आच्य मध्ये जानुनी वामुष्टिना व्रीहीन्गृहीत्वा तिपितृभ्य आ
यत्राथोव्येदिलास्तृतः मस्यादिति। आश्वलायनः। दक्षिणातो निष्ठनामो
रूघवरु स्थाली इष्टाणि निहृनेदिति। ततएवं गृहीत्वा दक्षिणाग्नेरुत्तरतो
गार्हपत्यस्य पुरस्ताद्दक्षिणामुखोक्तिष्ठन्नवहन्तीति। अन्वशाखानरा दक्षि
णाग्नेरुत्तरतो ऽदग्रीवं कृष्णाजिनमास्तीर्य तत्रोलूखलं निधायतस्मिन् व्री
हीणाप्रक्षेपं कृत्वा मुसलमादाय दक्षिणामुखस्तिष्ठन्नवहननं कंडन ५

६ व्रीहीणां करोति नमः शूर्पमादायोलूखलाद्व्रीहीन् त्रिः काश्यति प्रवनेन तुषं ६
निष्काशयेत्। आपस्तंबः॥ अपरेणान्वाहार्यपचनं प्रत्युदग्रीवं कृष्णाजि
नऽउलूखलं प्रतिष्ठितं दक्षिणा प्राचीतिष्ठती पत्न्यवहंति परापावमविवेकं
सकृत्फलीकरोति दक्षिणाग्नोजीव तंडुलं श्रपयतीति॥ आश्वलायनः॥
कृष्णाजिनऽउलूखलं कृत्वेतरोपत्न्यवदो विचयपवहंता सकृत्प्रक्षाल्य द
क्षिणाग्नावश्रपयेदिति॥ ॥सकृत्फलीकरोति। ततः सकृदेव फलीकरणं
करोति। लोके तस्य पुनः पुनः क्रियमाणत्वात् सकृदित्युच्यते। सन्न
घेनेन गार्हपत्यमिति प्रक्रम्य सर्वस्य श्रुतत्वात्॥ सारतंडुलमपूर्णं अप

Indira Gandhi National
Centre for the Arts

यित्वाभिघार्योद्वास्यमेक्षणेनजुहोत्यग्नयइतिसोमायेतिचाऽप्नंवरुं सारतं
ड्लेईषन्स्वित्रतेडुलातथोऽश्रपूर्णा।यथाश्रृतंतेनचरुणाऽस्थाल्याःपूरणेनभव
तितथाकर्त्तव्यं॥ एवंविधंचरुंश्रपयित्वाआमादितेनाज्येनाभिघार्यदक्षि
णतऽद्वास्यदक्षिणाग्नेःपूर्वमार्गेणापदक्षिणमुत्तरंआनीयसव्यंकृत्वाति
ष्ठं स्थितःसमिधआधायोपविश्यप्राग्मुखोमेक्षणेनचरुंजुहोतिदक्षिणा
ग्नेः।अग्नयेकव्यवाहनायेतिसोमायपितृमतइतिद्वाभ्यांप्रतिमंत्रंहुत्वा
हुती॥ब्रह्मकुरणं॥ ततोघृताक्तमक्षेनुसांशमादायसावितेतानमा
कशिष्यइतिमयतःप्रार्थयोद्दृजान्॥ॐकुरुघेतातेरुक्तोदक्षिणाग्नि

समाश्रयेत्॥दक्षिणाग्नेश्चतुर्दिक्षुदर्भानास्तीर्यवाद्यतःदद्याञ्चसमिधस्त्रिस
त्तस्मिन्स्थादेशमात्रिकाःपालाशाःसमिदर्थंचानियोज्याःसिद्धकर्मणि।घृताक्ताः।
समिधोकृत्वादक्षिणाग्नाःसमंत्रकाः।मेक्षणेनघृताक्तेनजुहुयादाहुतिंत्र
यमिति।अत्राग्नौकरणसमिदाधानदर्शनात्पिंडपितृयज्ञेपिसमिदाधानस
मूलं।श्रृतमभिघार्यदक्षिणेनोद्वासनीतिमानवे॥कात्यकेच॥यज्ञोपवीती
प्राङासीनोमेक्षणेनजुहोतीतिशांखायनः।अथर्युरुपवीतीदक्षिणाग्नौ
न्वाच्यमेक्षणेनऽपवीतेनावदायाभिघार्यत्यादत्तंवः॥कात्यायनः॥अग्नौ
करणहोमस्यकर्त्तव्यऽपवीतिना।सापव्यनेनदेवेभ्योजुहोतीतिश्रुतेरिति।

श्रुतेः

Indira Gandhi National
Centre for the Arts

था २

७ अत्रकेचिदपसव्येनहोमंकुर्वंतितेषांसऽह्वास्यामोहिह्याकुतीनुहोतिदेवमप्य
इतिस्वश्रुतिविरोधः॥ अतस्तद्व्याख्यातरीयंविधानं तैवकात्यायनः॥ अपस
व्येनवाकार्यंदक्षिणाभिमुखेनचेतिमेक्षणंचहोमसाधनत्वादेकंकृतं॥
॥७॥ पालाशमपिभवति। तथाचकात्यायनः॥ इध्मजातीयमिध्मार्धप्रमाणंमेक्ष ॥७॥
णंभवेत्। वृत्तंचांगुष्ठपृथ्वग्रमवदानक्रियाक्षममिति॥ अत्रहरिस्वामिनः॥
एतेआकुतीपिंडदानेगर्भूते। ततश्चाग्निस्पृतयोर्नैचरुरुत्साहः॥ किंतर्हि
शाखाश्चैवतेत्वाश्रमप्राप्राज्येनहोतव्यमिति॥ प्राग्यतदक्षिणो नोल्लिख रामः
त्यपहताइत्यरेखांवा। तन्मेक्षणंदक्षिणाग्रंप्राग्यप्रस्तुतत्वात्तेदक्षिणाभि ७

कृ २

७

दक्षिणेनतस्माद्दक्षिणस्यांदिशि॥ अथवातंदक्षिणाभिमपरेणतस्माद
परस्यांदिशिवा। मध्यतोलिखतिदक्षिणामस्यालेखाकरोत्यपहताइति
मंत्रेण। सव्येनहोमपक्षेमेक्षणाप्रासनमपिसव्येनैवतदंगत्वात्। तदंगत्वं
चाग्नेमेक्षणाभ्याधानात्स्विष्टकृदज्ञानमितिश्रुतेः॥ अपसव्येनहो
मपक्षेत्वपसव्येनैवमेक्षणप्रास नमिति॥ स्यच्येतनिशाखातरात्॥
तथाचापस्तंबः॥ सकृत्स्फ्येनोल्लिखति। आश्वलायनोपिस्फ्येनलेखा
मुल्लिखेदपहताइति॥ ॥उल्मुकंपरस्तात्करोतियेरूपाणीतिरेखाया
परस्तादेखायादक्षिणादेशेयेरूपाणीतिमंत्रेणउल्मुकंदक्षिणाग्ने
प्र

Indira Gandhi National
Centre for the Arts

श्री० रेकदेशं नि दध्यादित्यापयति॥ ॥उदपात्रेणावनेजयत्यपसव्यं सव्ये
रु नस्वोद्धरणसामर्थ्यादसाववनेनिक्ष्वेति यजमानस्य पितृप्रभृतींस्त्रीन्॥
उदकस्य पात्रमुदपात्रं पूर्णपात्रादि। तेनोदपात्रेण ह्युर्यजमानस्य पितृ
॥८॥ प्रभृति पितृगणस्य त्रीन्पुरुषान्पितृपितामहप्रपितामहानपसव्यं यथास्या
द्दक्षिणस्य मध्यप्रदेशाद्दक्षिणप्रदेशेनोदकानि नैयायास्यात्तथांगुष्ठप्रादेशि पत्रं ४
न्योरंतरालेनावनेजयानं अवनिक्तान्सुचीन्करोति पिंडदानाय तच्चाशि ८॥
ष्टे तेषु पिंडेषु देवतादि निश्चेतः। असावि ति संबुद्ध्यंत गोत्रनामादेशपूर्व रामु०
कं अमुकसगोत्र यजमानपितरमुकशर्मन्नवनेनिक्ष्वेत्यनेन मंत्रेण। एवं पि रु
नै

तामहामुकशर्मन्प्रपितामहामुकशर्मन्निति॥ रेखायां तलमध्यायप्रदेशे
[illegible] त्वष्टुदक्षिणांसेष्यमव नेजनं कार्यं। अपसव्यमवनेजनं कस्मा
त्। सव्येनोद्धरणसामर्थ्यात्॥ अनेन सूत्रावयवेनाहूरेति मनुष्येभ्य इति श्रु
तिः प्रकटीक्रियते। अस्याति। अस्यां दिश्यतो अभिनयेन पितृणामंगुष्ठप्रा
देशिन्योरंतरालेन दानं प्रतीयते। तथाहि सर्वा इति ददातीति वैश्वदेवेभ्यो
ऽनुहत्य हूरेति मनुष्येभ्यो थैवं पितृणामिति। अयमादेवानां दामः कनिष्ठि
काप्रदेशेन मनुष्याणां मुद्रणां प्रविवेष्याणा परलपर्णीमं। अथैवमित्यंगुष्ठ
प्रादेशिन्योरंतरालमेव पितृणां परिशिष्यते। अतः इदमाहापसव्यमिति।

Indira Gandhi National Centre for the Arts

यजमानपितृप्रभृतीनिस्तृणात् । असावेतत्त इत्येवयजमानस्यपितुरितिश्रु
तेश्चपिंडपितृयज्ञे यष्टुरेवकर्तृतिप्र तीयते॥ ॥उपमूलं सकृदाछिन्नानि
लेखायांकृत्वायथावनिक्तंपिंडंदद्यात् असावेतत्तइति। अवनेजनानंतरंउ
स४ पमूलंमूलसमीपेसकृदाछिन्नानि एकेनैवप्रयत्नेनछिन्नानिदर्भतृणानि
॥श्री॥ स्तीर्णाग्राणि रेखायांकृत्वा आस्तीर्य यथावनिक्तं यत्रदत्तावनेजनं य ॥श्री॥
स्ययस्यकृतं तत्रतत्रपितृपितामहप्रपितामहानांपिंडान्दद्यात् असावेतत्त
इतिमंत्रेण। असावित्यस्यस्थाने अमुकसगोत्रामुकशर्मन्नेतत्त इतिप्रयो
गः। आपस्तंबः। सव्यंजान्वाच्यावाचीनपाणिः सकृदाछिन्नेबर्हिषि दद्या

णापवर्गान्पिंडान्दद्यात् असावेतत्ते ततसो ये च त्वामन्वित्येतैरिति। अत्राहाप
स्तंबः॥ समूलं सकृदाछिन्नंबर्हिराहरतिसकृदाछिन्नानिवातृणान्युपमू
लदिनानीति। बर्हिः कुशाः। तृणानिकाशादीनिहेमाद्रिः। अत्रविशेषमा
हदेवलः॥ तस्मिन्स्थानेततोदर्भानेकमूलाञ्छिखान्वहून्। दक्षिणाग्रान्
दद्यादास्तीर्णांस्तुणुयास्यमे। तस्मिन्निति पिंडदानस्थाने। एकमूला
न् एकमूलसंसक्तवद्दुशिखान्। शिखानितिसाग्रानस्फुटितानग्रत्वा
दिवीशिष्टान्। वद्दुवचनात्रीनेवेति नियमोमाभूदिति वहून् भूम्याछा
दनपर्याप्तान्। संख्यानियमस्तुनास्ति आस्तरणस्यादृष्टार्थत्वात्॥ सम॥

Indira Gandhi National
Centre for the Arts

समस्थलेनतयासमातरनयासममूलतयाचेति। एकमूलत्वावधानादेवते
षांसमूलत्वमपिगम्यते। अतएवोपमूलेमूलसमीपएवक्षेप्तुमुक्तं॥ ॥ य
चत्वामन्विति। क। एकेएतत्रेयचत्वामनुइत्येवंपिंडदानमंत्रशेषंकुर्वीत।
मानवे। पिंडान्निदध्यातिपितुर्नाम्नासवैतत्रेयचत्वामनुतस्मैतेस्वधेति
प्रथमे: पितामहस्यनाम्नास्थितीयांसंमध्यमे। प्रपितामहस्यनाम्नास्यवि
ष्टेदक्षिणांद्वयोरपरयोर्नामनीगृह्णन्मूलदेशेलेपंनिमार्ष्टिलुप्यतेजीव
त्पितुःपिंडनिधानेवाजीवत्पितामहस्यवानजीवंतमतिदद्याद्ददद
याद्येभ्यएवपितादद्यात्तेभ्योददयाद्दिवंधुनामनविद्यास्वधापितृभ्यः ८

पृथ्विविषद्भ्यइतिप्रथमेपिंडंदद्यात्स्वधापितृभ्योंतरिक्षसद्भ्यइतिद्वितीयं
स्वधापितृभ्योवर्हिषद्भ्यइतितृतीयंइतिएवं:मेवापस्तंबसूत्रेपि। यदिद्विपि
तृकः स्यादेकैकस्मिन्पिंडेद्वौद्वावुपलक्षयेदितिविशेषः। शौनकःनामा
न्यविद्वान्पितःपितामहप्रपिताःमहाइति। ब्याचक्षीत। गोत्राज्ञानेतुकाश्य
पसगोत्रपितःपृथ्विविषत्। अवनेनिक्ष्व। पितामहांतरिक्षसत्। प्रपिताम
हदिवसदितिप्रयोज्यं॥ ॥अत्रपितरइत्युक्त्वोदङ्ङासीनआतमनात। अत्र
पितरइतीममंत्रंपिंडसंमुखएवोक्त्वासंहितान्वारप्पविल्वा:प्रदाक्षिणा
पर्यावृत्यादङ्मुखोभूत्वाश्वासधारणंकृत्वोपविशेत्। आतमनाता। मु

Indira Gandhi National
Centre for the Arts

ग्लानौ। तमनेग्लानिः शनवोदश्नुरतावस्थानमात्रेण तमनं संभवति अतः शा
८ रवीन शेक्त्यस्वासंचारणामर्थोत्कार्यं। तथाचाश्वलायनः॥ यथाशक्त्यप्राणा
न्नायम्येति। प्राणान्प्राणानिरोधं कृत्वेत्यर्थः। तदाह विष्णुः॥ यथाशक्ति
प्राणानिरोधं कृत्वासीतती शक्तिमनतिक्रम्य यथाशक्ति जपश्चाघं॥ तत्र
जपत्यत्र पितरो मादयध्वमिति श्रुतत्वात्॥ ततश्च संहितायां प्रयोगः
॥ आवृत्यासीमदंतेतिजपति। आवृत्य प्रदक्षिणं प्रत्यावृत्य पिंडसंमुखो
भूत्वामीमदंतेति मंत्रं जपति संहितायां पारणं॥ ॥ अवनेज्यपूर्ववन्नीविं
विस्रंस्य नमोवइत्यंजलिं करोति। पूर्ववदवनेजनदपात्रेणावनेजय ९

तीत्यादिप्रकारेणावनेजनं कृत्वानीविं विस्रंस्य नमोवइत्यादिभिः षड्भि
मंत्रैः षडंजलीन्कुर्यात्। षट्कृत्वो नमस्करोतीति श्रवणात्॥ षडंजलि
मितिसूत्रे एकवचनं। तथापि समानायां श्रुतौ महापितृयज्ञे षट् नमस्का
रानिति बहुवचनेनोक्तत्वात् तथैवानुष्ठानं युक्तं। अत्र नमोवः पितरो मन्य
वे नमोवः पितरः पितरो नमोव इत्येतावान्षष्ठो मंत्रः विपंचचतुर्थ्यंताः
प्रसिद्धा एवा गृहानः प्रभीत्वो वा पिंडानां चावेक्षणं कुर्वीता गृहान्नः पित
र इति जपश्च महापितृयज्ञवदत्रापि कार्यः समानश्रवणात्॥ ॥ एतद्वः
इत्युपास्यतिसूत्रेण प्रतिपिंडं। एतद्वः पितर इत्यनेन मंत्रेण प्रतिपिंडं

Indira Gandhi National Centre for the Arts

श्री०
एतद्वः पितरइत्यनेनमंत्रेण प्रतिपिंडं बहुवचनात्त्रीणि त्रीणि सूत्राण्युपास्यति पिंडाना
मुपरि निदध्यातीत्यर्थः ॥ ऊर्णां दशां वा ऊर्णा मेषरोमाणि तदभावे वस्त्रदशा वा बहुत्व
१० विशिष्टाः प्रतिपिंडं एतद्व इति प्रास्यति । अथवा ऊर्णां वा दशां वेति पदद्वयं ॥ तत्राप्यनु
मानवे ॥ वाससऊर्णां दशां वेति । आपस्तंबसूत्रे । वाससो दशां छित्वा निदध्यात् ऊर्णा
स्तुकां वा पूर्वे वयस्युत्तर आयुषि स्वलोम वेति ॥ ॥ वयस्युत्तरे यजमानलोमानि वा
४ । उत्तरे यसि यजमानस्य पंचाशत्तमवर्षादूर्ध्वं यजमानलोमानि वा पालितानि हृद
यस्थाने प्रतिपिंडं प्रास्यति । उत्तरशब्दोपादानात् पूर्वोत्तरभागेन शतवर्षरूपस्य व
यसो द्वेधा विभागः ॥ तथा च पराशरः ॥ पंचाशद्वार्षिको यस्तु दद्याल्लोम स्वमंशुक १०

मिति शाट्यायनि ॥ पंचाशतऽर्द्धमुरो लोम यजमानस्येति ॥ ॥ ऊर्जमित्यपो निषि
ञ्चति । पितॄणामधिष्ठाने पिंडाः तेन ऊर्जं वहंतीरित्यनेनमंत्रेण उदपात्रेण अवनेज
नावशिष्टमुदकं पिंडानामुपरि निषिञ्चति । पिंडसमीपे भूमौ वा । ऽभयथाशाखांत
रेसत्वात् । स्वधास्थ तर्पयत मे पितॄनिति मंत्रलिंगात् ॥ अवघ्रायावजिघ्रति यज
मानः । पिंडान् हविर्भुः स्थाल्यां प्रत्यवदध्याति स्थाल्यां पिंडांश्च अवधायेत्यापस्तंबः ।
ततो यजमानः सव्यं कृत्वा पिंडान् स्थाल्यां स्थाने वा अवजिघ्रति । अवघ्राणं यजमा
नसंस्कारः स यजमानभाग इत्यर्थवादात् ॥ ततश्च प्रोषिते यजमानेन भवति
। अत्रत्यवाहेशः पूर्वकालतामात्रे । समानकर्तृकतायां । निरूढ्याज्यं प्रातर्दी

Indira Gandhi National Centre for the Arts

२२ हनमितिवत॥ ॥उल्मुकमक्तदाच्छिन्नान्यमे।पूर्वसक्तदाच्छिन्नानियानिरेखाया
मोपृतान्यभूवन् तान्यग्नौ दक्षिणाग्नौ प्रक्षिपेद्वे ततउल्मुकं तत्रैव प्रतिप्रक्षिप
ति।अथैतान् सकृदाच्छिन्नान्यभ्यादधाति।पुनरुल्मुकोपसृजतीति।अस्मात् सूत्रे चोल्मु म॰
कस्य प्रथमो ग्रहणमल्पान्तरत्वात्।तेन प्रथमं सकृदाच्छिन्नप्रासनं।ततउल्मुक
स्य॥आधत्तेति मध्यमपिंडं पत्नी प्राश्नाति पुत्रकामा।पुत्रकामा गर्भग्रहणयोग्या
सती प्राश्नाति पत्नी मध्यमपिंडं पितामहस्य पिंडं आधत्त पितरो गर्भमिति मंत्रेण
प्राश्नाति॥आपस्तंबः॥ तं पत्नी प्राश्नाति पुमांसं ह जानुका भवतीति विज्ञाय
ते॥पत्नीवत्त्वे पिंडविभागो मंत्रावृत्तिश्चेति भूर्तस्वामि॥मानवे मध्यमपिंडं श्राम॰ २२

पत्नी प्राश्नीयाद्गर्भं वितरावादध्याद्ब्राह्मणो वा मंत्रयेद्गर्भमागमयेदिति।[illegible]
शरः।पिंडानां मध्यमं पिंडं पितृन् ध्यायन्समाहिता।प्राशयेत्पुत्रकामस्तु भार्यां
तं आह्य दक्षिणां स्नुषा वा पिसगोत्रा वा पुत्रकामाहितव्रताज्ञया।आधत्त पितरो ग
र्भमाहरेयुर्हि ज्ञातयः।महारोगगृहीता वा तद्रोगोपशमाय च।घ्रेद्वा मपि तरो
गमित्युक्त्वा प्राशयेच्च तं।अन्यान् सुद्भुताशे वाप्सु पेद्वे हि जायवा।अजाय वा
ब्रूदद्याच्च पश्चाद्विप्रविसर्जनमिति॥ ॥प्रेतेभ्यो ददाति।यस्मिंतत्प्रभृतिभ्यो द
दाति।यस्मिंतत्प्रभृतिभ्यो दानमुक्तं तस्मै तेभ्यो मृतेभ्यः पितृपितामहप्रपितामा
हेभ्यो ददाति॥अत्र हरिस्वामिनः॥के पुनस्ते पितरो येभ्य इदं दीयते।उच्यते।

Indira Gandhi National Centre for the Arts

यजमानस्यपित्रेददातीत्यादिवचनादेतएवपितरस्तेभ्योपिजीवद्भ्यएवदानेप्रा
प्तेभ्योददातीतिवचनात्सकृदुत्थेवपराचः पितरइत्यादिदर्शनेभ्यश्चप्रेतेभ्यो
२३ देयं।अथवाएतेदेवावसवःपितरोज्ञेयारुद्राज्ञेयाःपितामहाःप्रपितामहास्तथा
दित्याइत्याद्याः।तथापितरोवैतआसन्निति।तथाशरद्धेमंतःशिशिरस्तेपितर
इति।तथाग्निष्वात्तादयःपितृगणाः।तेषांत्वोपयोगःउच्यतेए~ मेवतुआधि
दैविकाःपितरः।ततश्चयथाब्राह्मणोतृप्यतिपितरस्तृप्यंति।तथातेष्वपितृष्व
स्वाधिदैविकावस्वादयस्तृप्यंति।महापितृयज्ञेतुतएवसोमवदादयइत्यंते
पिंडाश्चप्रेतेभ्यएवदीयंते॥ ॥जीवपितृकोपि[illegible]ति।जीवपितृकोपिपिंड २३

पितृयज्ञे[illegible]विक्रियते॥जीवांतर्हितेपिवयतो।जीवपितृकस्यजीवेनपित्रादि
नोअंतरेपिव्यवहितेपिपितामहादौपिंडदानंभवतिसोमादाविवायेभ्यएव
पितादद्यात्तेभ्योदद्यान्नयामुतइतिस्मृतेः॥जीवपितृकस्यहोमांतमनारंभो
वा।जीवपितृकस्ययजमानस्यहोमांतमेवपिंडपितृयज्ञसंज्ञंकर्मभवति।अ
थवाअनारंभएवपिंडपितृयज्ञस्य।वाशब्दःपूर्वपक्षनिरासार्थः।अनारंभंद्व प४
एवमुक्तः।यतःपिंडदानंप्रधानं।तदभावेहोमा: तस्यांगभूतस्यानुष्ठाने
नघटते।एवंजीवपितृकापीतिपक्षेह्यपित्वेदानीजीवपितृकस्यहोमांत
मित्यत्रोपपत्तिमाह॥॥नत्वनेतेजातकेएर्पोनजीवंतमतिददातीतिश्रुतेः।

Indira Gandhi National
Centre for the Arts

जीवपितृकस्य होमांतं कर्म कुतः। यतो नान्वारंभणीयावार्यत्वेनेत्रजीवतापि
त्राद्यवहिते पितामहादौ पिंडदानं न भवती त्यहं कुतो नान भव ती त्यत्र हेतुः न जी
२५ वंतमतिददातीति शाखांतरे श्रवणात्। अतः प्रधाने पिंडदाने जीवपितृकस्य
निषिद्धे अनारंभ एव बह्वृच नेन होमांतता॥ आपस्तंबः॥ यदि जीवत्पिता न दद्या
द्वा होमांतं कृत्वा विरमेदिति॥ मानवे च॥ यदि दद्याद्येभ्य एव पिता दद्यादिति
॥काठके॥ पिता पुत्रो वेदाहिताग्नी स्यातां येभ्यः पिता तेभ्यः पुत्रो दद्यात्पिता
प्रेतः स्यात् पितामहो जीवेत्पित्रे पिंडं निधाय पितामहात्परेभ्यां दद्यादिति॥
श्चोनोदतेत्यदृष्टवेति पक्षेच चतुर्दश्यामप्युपवासो विहितः। तदा च चतुर्दश्या २५

र्दश्या

मप्युपवासो विहितः। तदा च तु मन्वाधानादि कृत्वा प्रातरमावास्यायां दर्शेष्टिः
क्रियते। ततो अपराह्णे पिंडपितृयज्ञः प्राप्नोति॥ अपराह्णे पिंडपितृयज्ञश्चंद्रा
दर्शने मावास्यायामिति तत्कालस्य प्रागुक्तत्वात्। अमावास्योपवासपक्षे वामा
वास्यायं पूर्वाह्णे दर्शार्थमग्नीविहृत्यान्वाधानं कृत्वा वैश्वदेवं च कृत्वा ततो
पराह्णे पितृयज्ञः प्राग्दर्शेष्टेः प्राप्नोति। एवं कदाचित्स्यात्कदाचित्पश्चादित्यनि
यमे प्राप्ते नियमार्थमाह॥ ॥पूर्वेद्युः [illegible] गत्वा पिंडपितृयज्ञः। पूर्व एव दर्श
ष्टेः पिंडपितृयज्ञोऽनुष्ठात्॥ एतेन जीवपितृकस्यैव चतुर्दश्यामुपवासप
क्षेऽनमृतपितृकस्योत्युक्तं भवति। तस्य हि पिंडपितृयज्ञोवश्यं दर्शात्प्रागेव क

Indira Gandhi National Centre for the Arts

न्त्यः। न चासौ चतुर्द्दश्यामुपवासपक्षे प्राग्दर्शोऽसंभवति। विहितकालाभावमतोऽ
२५ तोमृतपितृकस्यामावास्यायामेवामवा सोजीवपितृकस्य चतुर्द्दश्याममावास्या
यां वेति विकल्पः॥ ॥प्रकरणकालल[illegible]गानुग्रहवचनानाहितः भिश्रुतिथ्यो
नगं॥ पिंडपितृयज्ञ इत्यनुवर्त्तते॥ पिंडपितृयज्ञो दर्शस्यानंगं। दर्शांगं न भवति।
कुतः। प्रकरणभेदात्। अस्य प्रकरणे यत्पद्यते तत्तदंगं भवति। न चायं दर्शप्रक
रणे पद्यते। अतोनंगं॥ किंच। कालभेदात्॥ अंगानां प्रधानकालताच्चाप्येति
न्यायादंगानां प्रधानानामेककालता भवति॥ अत्र च कालभेदो विद्यते। दर्श
स्य प्रतिपत्पूर्वाह्णस्य पिंडपितृयज्ञस्यामावास्यापराह्णस्येति अतोपि नंशां २५

गतया॥ लिंगाच्च। यस्मादगृहीतःपौर्णमासेन यजेत पितृयज्ञे नैवामावास्य
[illegible] मनुः वेदस्यामावास्यां विनापि केवलं पितृयज्ञं दर्शयति। यदि दर्शांगं स्यात्। त
दा दर्शप्रधानं विना केवलस्यांगमात्रस्यानुष्ठानदर्शनं न स्यात्॥ अस्ति चात्र
तो स्माल्लिंगादपि न दर्शांगं [illegible]। तथा॥ अनुग्रहवचनाच्च॥ अस्य पिंडपितृ
यज्ञस्य गव्यामयनादौ संवत्सरसत्रे दर्शात्पृथगनुग्रहवचनमस्ति। कथमे
षा पितृयज्ञो नंतरितो भवतीति यद्यंगं स्यात्। तदा कथमेषाममावास्य
हविरनंतरितं भवतीति दक्षावपुरोडाशेन वेत्यमावास्यानुग्रहेणैव पितृय
ज्ञस्यापि प्रयाजादिवदनुग्रहवचनेन स्यात्॥ अस्ति च पृथगनुग्रहवचनं

Indira Gandhi National
Centre for the Arts

पासनेरितिद्भ्यादीति।अतोथनंगं।अपिचानाहिताग्निश्रुतेश्चाअनाहिताग्नेरपि
पिंडपितृयज्ञः श्रूयते।अथनाहिताग्निनाकार्यइति।यदिदर्शांगं स्यात्तदाअना
१६ हिताग्निर्दर्शाभावान्नश्रूयते।श्रूयतेच।अतोपिनदर्शांगमिति॥ एवंप्राप्तेआ
ह॥ ॥अंगंवासमभिव्याहारात्।अथवादर्शांगमेवपिंडपितृयज्ञः।कुतः।स
मभिव्याहारात्।समित्येकीभावे।अभीत्याकांक्षायां।ततश्चआकांक्षायोग्य
तासंनिधिमतांपदानामुच्चारणं समभिव्याहारोवाक्यं।तस्मादित्यर्थः।पूर्वे
पितृ२ द्युर्देवेभ्योयज्ञंनिष्क्रीयप्रातर्देवेभ्यःप्रतनुतइति॥तेनयथाप्रथमेशांतिकेन्द्रे
त्वाततःकृत्यंसमारभेदित्यादीग्रहयागादेर्विवाहाद्यंगत्वं एवमत्रापिदर्शां १६

ग त्वंपितृयज्ञस्येति।ननुपूर्वपक्षेऽक्तंप्रकरणभेदादनंगमिति।तत्रोच्यते
प्रकरणांतरपठितमप्यंगं भवति।यथाप्रवर्ग्यःसौत्रामणीचेति।यच्चोक्तं
कालभेदादिति तत्रोच्यते।भिन्नकालेविहितमपिवचनादंगंभवति।यथाग्नि
होत्रदर्शपूर्णमासादावुद्धरणादि।यच्चमणाश्रहीतइत्यादियदनंगत्वे
लिंगमुक्तंतत्तुवाचनिकंदर्शंविनापिंडपितृयज्ञस्यकेवलस्यानुष्ठानेना
स्तिवचनस्यातिभारः।अतस्तदपिनानंगत्वसाधकं।यच्चोक्तमनुग्रहव
चनादितितदनुग्रहवचनमर्थवादत्वादयमंगत्वेऽप्युपपद्यतएव॥अतस्तद
पिनानंगत्वंज्ञापयितुमीष्टे।यच्चोक्तमनाहिताग्निश्रुतेश्चेति।तदपिन्या

म२

Indira Gandhi National Centre for the Arts

यविरुद्धं वाचनिके अनाहिताग्नेर्दर्शं विना पिंडपितृयज्ञस्यानुष्ठानविधा
१७ नेन हि वचनप्राप्तिर्न्यायसद्भावेऽपि पराकर्तुं शक्या। तस्माद्दर्शं पिंडपितृय
ज्ञ इति जैमिनेर्मतं गमेव। तथा चाह पिंडपितृयज्ञस्य कालत्वादनंगत्वादि
ति। पिंडपितृयज्ञ उक्तः॥ इदानीं दर्शेष्टिमाह॥ ॥यस्यां नोदेतत्य दृष्टेवा पर्ण
शाखां छिनत्ति शामीलीं वेषे त्वोर्जे त्वेति वा। श्वः आगामिनि दिवसे न
उदेता नोदेष्यति चंद्रमा इति ज्ञात्वा चतुर्दश्यां पर्णशाखां पर्णस्य पलाश
स्य शाखां इषे त्वेति मंत्रेण ऊर्जे त्वेति अनेन वा मंत्रेण वृक्षां छिनत्ति। अथ
वा शामीलीं शमीमयीं शाखां छिनत्ति। चतुर्दश्यां कुतः। नहि केह ष्टापवसं १७

तीति वचनात्॥ अदृष्टे वा अथ वा अदृष्टे चंद्रमसि यथोक्तां शाखां छिनत्ति।
अमावास्यायामित्यर्थः। तदुक्तं। अमावास्यायाममावास्येन यजेतेति
वचनात्। तथा च सोमयाजी तु क्षीरयाजीत्यादिना चतुर्दश्यामुपवास
पक्षे दोषमुक्त्वा हस्यत्रैव एतां रात्रिं न पुरस्तान्न पश्चाद्दृश इत्यादिनाऽ
मावास्यायामुपक्रमविधानाच्च॥ शम्याश्च वपदः शामीली। शम्याष्ठ्लीत
दित्वात् दिड्ढाणि ङिति ङीप्। तां वा छिनत्तीषे त्वोर्जे त्वेत्युभयोश्छेदने विधा
नात् करणमंत्रत्वेन समुच्चयासंभवाद्विकल्प उक्तः॥ ॥छिनद्मीति वो
भयोः साकांक्षत्वात्। इषे त्वोर्जे त्वेत्यनयोरुभयोरपि मंत्रयोः प्रयो

गोछिनमीतिशेषोभवति॥कस्मात।साकांक्षत्वात।क्रियापदप्रयोगस्यापे
२८ क्षत्वात।ननूभयोरपिछिनमीत्यध्याहारःकुतः।तामाछिनत्तीषित्वोर्ज्जे
त्वेतिद्वयोरपिछेदनेविनियुक्तत्वात।ऊर्ज्जेत्वेतिमंत्रेवैकल्पिकमध्याहा
रांतरमाह॥संनमयामीतिवोत्तरे॥अथवोर्ज्जेत्वेत्यस्मिन्नुत्तरमंत्रेसंन
मयामीत्यध्याहारोभवति।नछिनद्मीति।कुतः।ऊर्ज्जेत्वेत्यनुमार्ष्टीतिशाखा
तरात।अनुमार्जनंवपर्णादिपातनेनप्रगुणीकरणं।तच्चमंत्रलिंगादे
वप्राप्तत्वात्दाखार्थेणानसूत्रितं।अतश्चमार्ज्जदिनीयपाठाश्रयणात्द्वयोर्मं
त्रयोर्विकल्पेनछेदनेवि नियोगः।काण्वशाखापाठाश्रयणात्उत्तरस्यानु २८

मार्जनएवविनियुज्यते॥तथाचापस्तंबः।ऊर्ज्जेत्वेतिसन्नमयत्यनुमार्ष्टिवेति
संनमनमृजुकरणं।मूलादारभ्याग्रस्पर्शनमनुमार्जन मितिधूर्त्तस्वामी
काठके॥परिकूलानेर्व्रतोपेतस्याध्वर्युःशाखांछिनत्ति।शमीशाखांपलाश
शाखांटभपिंजूलानिवेषत्वेतितयाचतृणांवत्सानपाकरोति।देवोव
इतिधेनुःप्राच्वीःप्रकालयतीति॥मानवेच॥व्रतोपेतस्यशाखामच्छेतीति
लप ॥बहुलाशामस्तुःष्कांग्राप्रागुदीचीमन्यतमांना।कीदृशींशाखांछिनत्ति।
ल२ बहुपलाशां।बहुलपर्णां।पुनःकीदृशी।अशुष्काग्रं।अशुष्कमाईमग्रंय
स्याःसातथा।पुनःकीदृशीं।प्रागुदीचीं।वृक्षादेशान्यांदिशिप्रसृतां।अन्य

Indira Gandhi National Centre for the Arts

तमांवा।प्राचींवाहृत्वास्यांदिशिप्रसृतां।उदीचींवाहृत्वाउदीच्यांप्रसृतां
१९ वा।प्राचीमाहरति।उदीचीमाहरति।प्रागुदीचीमाहरतीतिशाखांतरात्॥ ॥
व्रतमुपैति।शाखाच्छेदनानंतरमंतरेण।परीग्रीगत्वापरेण।आहवनीयंप्राङ्छि
छन्नामिमीक्षमाण।उपस्पृश्यव्रत मुपैत्यग्नेव्रतपतइदमहमिति।वेत्य
नेनप्रकारेण।व्रतमुपैति।ननुकिमर्थमिदमुक्तं।पौर्णमासवदन्यदसंग्रह
त्यनेनप्राप्तत्वादितिचेत्।सत्यं।अज्ञातावसरस्यशाखाच्छेदनस्यकाल
विधानायेदमुक्तमित्यदोषः॥ततश्चव्रतोपायनीयाशनानंतरंशाखांछि
त्वाप्रगुणीकृत्यच व्रतोपायनंकर्त्तव्यं।शाखांछित्वा व्रतमुपैती १९

तिशाखांतरात्।अमावास्यायांव्रतग्रहण।स्यायमेवकालनियमइतिकस्य
चिच्छंकास्यात्तामपाकर्त्तुमाह॥ ॥यथोक्तंवा।शाखाच्छेदस्यास्मिन्नवावस
रेनियमनभवति।व्रतग्रहणंतुयथोक्तमस्मिन्नस्मिन्कालेवैकल्पिकंप्रागु
क्तंतथैवत व्रतत्रकालेवाभवतिवाइह।केचिदन्वाधानानंतरंपूर्वो
क्तएवशाखाच्छेदःकर्त्तव्यइत्याहुः।तेषांमतेव्रतमुपैतीत्यनेनव्रतोपा
यनस्यापिकालांतरविधिःक्रियतइति॥मातृभिर्वत्सान्समवसृज्यवत्संशा
खयोपस्पृशतिवायवस्थेति।ततःशाखाच्छेदव्रतोपायनानंतरंषड्भा
न्वत्सान्मातृभिःसहसंयोज्यवायवस्थेतिमंत्रेण।मात्रासंगतंवत्संशाख

Indira Gandhi National
Centre for the Arts

कृ

योपस्पृशति। उपस्पर्शनेन मातुः पृथक्करोतीत्यर्थः। तथा षड्वर्ग्याच्चत्वा
नपाकरोति दर्भपिञ्जूलैर्विति॥ आपस्तंबः। वत्सं शाखयेत्यत्र वत्सस्याहि श्य
२० मानत्वाल्लिंगवचनयोरविवक्षा। तेन प्रतिवत्समुपस्पर्शनं शाखया कर्त्त
व्यं। लिंगस्याविवक्षितत्वाच्च स्त्रीवत्सा अपि गावः मात्राप्यर्थं दोह्याः। अपि
होत्रे पुंवत्सामिति यत्र दर्शनादन्यत्रापुंवत्सापि भवतीति प्रतीयते। यदि
वत्सशब्देन वत्सतर्यभिधीयेत तदैतदुपपद्यते। वत्सानित्यत्र या
मापस्तंबसंघे वत्सतरुणीषु स्त्रीः इति सूत्रेऽत्र तरुणीष्वित्युक्तत्वात्तरुणीषु पुंस्
त्वेऽशेषः। ततश्च स्त्रीवत्सा अपि गावः मात्राप्यो भवति॥ उपायवस्येति २०

वैके। एके आचार्या वायवस्थेत्यस्मिन्मंत्रे उपायवस्थेति वा शेषं कुर्वंति। एतच्छाख
योपस्पर्शनं संयोजितानां वत्सानां मातृभ्यः पृथक्करणार्थं॥ देवो वः सवितेति मातृणा
मेकां ध्याकृत्य ततो वत्समाद्गवां मध्ये एकां गां वत्सेन वियोज्य देवो वस्त्यनेन
मंत्रेण तां गां शाखयोपस्पृशति। अनेकयजमानके च ध्रुवा अनथा गार्हपत्योः स्या
नेति ध्रुवा पश्चगोपतिषु स्यातेति यथार्थमूहः। अत्रैकस्या गोरुपस्पर्शनेन सर्वा
सां गवां संस्कारो भवति। मंत्रे आप्यायध्वमघ्न्या इति बहुवचन नदर्शनात्। अतो
वद्विनीदध्यं इमित्यत्र मंत्रस्योहो भवति। आप्यायध्वमघ्न्ये इति। अपरे तु उपस्पर्श
नस्य संनित्योपकारकत्वादेकस्या एव गोरयं संस्कार इत्याहुः तेषां मंत्रगतं वडु

Indira Gandhi National
Centre for the Arts

वचनं कृत्स्नार्थं ॥ ॥ ऐंद्रं भवति माहेंद्रं वा ॥ तस्मान्माहेन्द्रं विरेंद्रं दुदेवत्यं भवति महे
२१ न्द्रदेवत्यं वा ॥ गोरूपस्पर्शनमंत्रे इन्द्रस्यैव दर्शनात्तस्य तद्देवतात्वं माभूदिति मा
हेंद्रं वेत्युक्तं । तद्देके माहेंद्रायेति कुर्वंतीत्यतः । अपरत्वं ॥ नागतश्रीर्महेंद्र इंद्रयज्ञे
तच्चयोर्द्वावेव । तत्र यदुक्तं । सो वै गौतमो भरद्वाजस्तेनेतरं सोमेन्यायामहेंद्र इंद्र
यज्ञेरन्यो वा कश्चिदिति ॥ मानवे च ॥ सोमयाजिनी गतश्रीरेवौ । गौतमो भारद्वा
जस्ते महेंद्रं यजेरन्नन्वितरे संवत्सरमिंद्रमिष्ट्वाय येव्रतपतये ष्टाकपालं निरूप्य
ते महेंद्रं यजेरन्निति ॥ ॥ यजमानस्य पशून्पाहीत्यग्न्यगारस्यान्यतरस्य पुरस्ताद्वा
रसमुपगूहति ॥ द्वे अग्न्यगारे । आहवनीयागारं गार्हपत्यागारं च ॥ तयोरग्न्यगार ३१

योरभिप्रेतयोर्मध्येन्यतरस्याग्न्यगारस्याहवनीयागारस्य पुरस्तात्प्रदेशे पूर्वभा
गे वा । गार्हपत्यागारस्य वा पुरस्तात्पूर्वभागे वा शाखामुपगूहति यजमानस्य प
शूनिति मंत्रेण । अस्य पशूनिति मंत्रेण । अस्य चानेकयजमानके यजमानानां
पशूनिति यजमानयोः पशूनित्यूहः ॥ पशुं पाहीति ववहनीदक्षनिराजकृये ॥ ॥
मूलादुपवेषं करोति वेषोसीति मूलात् शाखामूलादुपवेषमुपवेष इति मंत्रे
णोपवेषं करोति । तत्र मूलं प्रथमं स्त्री शाखाया मूलमरत्निप्रमाणादधिक
प्रमाणं छित्वा पृथक्कार्यं । ततस्तस्मात्पृथक्कृतान्मूलान्मंत्रेणोपवेषं करोति ।
मूलतः शाखापरिवास्योपवेषं करोति नि शाखान्तेरात ॥ उपवेषश्चारत्निमा

Indira Gandhi National
Centre for the Arts

त्रःआदेशमात्रो वा परिशिष्टो ऽङ्कः। तस्य च कपालोपधानार्थत्वात्केवलपयोहवि
–केवलपयस्याहविष्के चोपधानाभावादुपवेषकरणाभावेपि रक्षीशाखा
मूलस्य परिवासनं भवत्येव। शाखीं परिवास्येति द्वितीयया परिवासनस्य शा
२२ खासंस्कारत्वावगमात्प्रथमस्यापयः पयस्य प्राकृतपयोविकारत्वेन परिवा
सितया शाखयोपाकरणं कार्यं। प्रकृतौ हि परिवासितया एव सोपाकरण
मिति॥ ॥सान्नाय्ये शाखासंयोगात्॥ इदं शाखोदुपवेषकरणं सान्नाय्यस
सान्नाय्यक दर्शेष्टावेव भवति। नान्यत्र। सान्नाय्यकदर्शेष्टौ पौर्णमासे वा। क
स्मात्शाखासंयोगात्। शाखया परिवास्योपवेषं करोतीति वचनादुपवेष २२

स्य शाखासंबंधावगमात्। शाखायाश्च वत्सापाकरणार्थत्वात्सान्नाय्ये के
वचत्सापाकरणाभावे शाखाया अभावात्तत्संबद्धस्य तस्याउत्पाद्यमानस्यो
वे पवेषस्याभाव एवमुक्तः॥ ॥उपधानाद्धोमयोः। वाशब्दः पूर्वपक्षनिरासा
र्थः। उपधानात्। उपवेषस्य कपालोपधानार्थत्वात्तस्य च सान्नाय्ये अस
न्नाय्ये केवलकर्मणि अभावादुभयत्रोपवेषो भवत्येव। ततश्च शाखाया अभावे
वारणो भवति॥ यत तस्तं विना तेन प्राचीं गा गानुहहतीत्यादि न सिद्ध्यति॥
॥ व सोः पवित्रमिति पवित्रमस्यां त्वं ज्ञातिकुशो। वसोः पवित्रमसीत्येत
वता मंत्रेणास्यां शाखायां कुशावेवह्रासायेदर्भदृणा एवमंत्रेव ध्नाति

वि१

Indira Gandhi National
Centre for the Arts

।त्रिवृदिति त्रिशलाकं त्रीणि दर्भतृणानीत्यर्थः हस्तेप्रादेशमात्रं तु त्रिवृत्त्वा
२३ पवित्रकमित्यत्र त्रिवृत्त्रिशलाकमिति हेमाद्रिणाप्येवं व्याख्यानत्वात्॥मा
नवेशेषः।दर्भमयंपवित्रं त्रिगुणरज्जुः शाखाणामनुलोममवसृजेद्ग्रंथिमकु
र्वन्निति॥आपस्तंबः॥त्रिवृद्दर्भमयंपवित्रं कृत्वा वसूनां पवित्रमसीति शा
खायां शिथिलमवसृजति मूले मूलान्यग्रेग्राणि न ग्रंथिं करोतीति।नवमि
श्रेण त्रिगुणं निर्मितमिति केचित्॥वर्णाकारमित्यन्ये।केचित्पवित्रबंध
नानंतरं शाखोपगूहनं कुर्वंति।तथा सत्युपगूहनस्य शाखायाश्च नाशार्थ
त्वेन दृष्टार्थता भवति॥पाकक्रमेण त्वदृष्टार्थता न चाणोदृष्टे संभवति युक्ता २३

तेनात्रोपगूहनमिति।अपरे तु वत्सापाकरणानंतरं पाकक्रमेणैव कुर्वंति॥
यवाग्वाग्निहोत्रहोमः संनयतस्तां रात्रिं।संनयतः सान्नाय्यं दुग्धं दधिरूपं
हविः कुर्वतो यजमानस्य तां रात्रिं तस्याममावास्यासंबंधिन्यां रात्रौ यवाग्वाख्य
वागूसंज्ञेन द्रव्येणाग्निहोत्रहोमः सायंप्रातर्भवति।तंडुलैः शिथिलपक्वा
यवागूरित्युच्यते।पेयाया यवागूरित्युक्ते स्वामी।संनयत इति विशेषणोपा
दानादसंनयतो न यवाग्वाहोमनियमः।नापि चरू सान्नाय्यालाभ इति
सान्नाय्यस्थाने चरुकरणं॥आपस्तंबः॥अमावास्यायां रात्र्यां स्वयं यज
मानोग्निहोत्रं जुहोति।अग्निहोत्रोच्छेषणमातंचनार्थं निदधातीति।पूर्वे

Indira Gandhi National
Centre for the Arts

मरूपेनेदग्धाग्रातंचनानंतरंयंवाऽन्यशेषस्य दोहम ध्येपन्नेपडत्कोन्निंत
२४ दर्थमेतदवशेषणं॥ मानवेच॥ यवाग्वैतारात्रीयजमानोग्निहोत्रंजुहोति
तैतस्याः पिंडंनिदध्यादिति॥ऊतउपसृष्टांप्रवृत्तादित्याह॥ऊतेग्निहोत्रेउ
पसृष्टामितिदोग्धारंप्रत्याह॥हेदोग्धः।उपसृष्टांवत्सेनसंगतांगांमाप्रतिप्र
दृताद्दितिप्रैषार्थः॥प्रोक्तेघोरसीतिस्थाल्यादानं।दोग्धा।घर्मेपुप्रत्युपसृष्टे
तिप्रोक्तेप्रतिवचनेघर्मपुर्घोरसीतिमंत्रेणस्थाल्याग्रादानंकरोति॥गोरूप
सृष्टावत्सेनसंगतातेनवयस्थाल्यादानादिकर्त्तव्यंभवतितन्त्रुर्विंतिप्रैषा २४
र्थः।ग्रादानंचाधिश्रयणार्थंतेनवामध्येपयस्याधिश्रयणं भावोदाना

दानमितिकेचित्॥कर्कः॥तदयुक्तं।विनैवपाश्रपणयोरधिश्रयणंभा
वेपितदादानमंत्रेण्हस्योक्तत्वेविरोधात्।ग्रधिश्रयणाभावेपिक्वचि
त्प्रदेशेस्थापनमवश्यंकर्त्तव्यं।तदर्थमप्यादानेमंत्रोभवत्येवेत्यपरो
स्थालीस्थानापत्यापशोवपाश्रपणीप्रादानेमंत्रस्य।घोस्थः पृथिवी
स्थः पृथिवीस्थइत्यूहः॥ ॥स्थालादानवोरश्वादानेवानूहितस्यैव॥
मातरिश्वनइत्यधिश्रयति।मातरिश्वनइतिमंत्रेणस्थालीमाहपत्ये
धिश्रयति।ग्राहवनीयग्रापिणास्याहवनीयएव॥ग्रत्रमातेयज्ञप
तीक्काष्टामितिद्वियजमानकेमातेयज्ञपतये।क्काघुरितिवड्ंयजमा

Indira Gandhi National
Centre for the Arts

नकेश्वहः॥ ॥वसोःपवित्रमितिपवित्रमस्यांकरोत्युदस्था। वसोःपवित्रम
२५ सिशतधारमितिमंत्रेण। अस्यांस्थाल्यां। पवित्रंकरोति। स्थाल्यां। पवित्रंकरो
ति। स्थाल्याउपरिस्थापयतिप्रागग्रमुदगग्रंवा। श्रोतवेनत्वाणुदगग्रत्वं।
अथपवित्रेनिदधातितेहैप्राङ्गिःदधात्याचीहिदेवानांदिगथोऽदगि
तिश्रुतत्वात्। प्राक्तायंपवित्रमादधातितिर्यक्प्रातरितिमानवे॥त
नत्थास्या एवारेश्रीतप्रायश्चित्तंभवति। केचित्पवित्रेशाखायांनियो
ज्यस्थाल्यांनिदधाति। दोहादानंतरंचपुनःशाखायांवध्नंति। अन्येतुशा
खावद्धमेवोखायांनिदधाति॥ ॥वाग्यतोदोहयन्पृच्छेत्। अध्वर्युर्वी २५

ग्यतः सन्पृच्छेत् पृच्छतिक्रेनब्राह्मणक्षत्रियवैश्यादिनापुरुषेण। गांदो
हयति। दोहयतीतिणिचतोपदेशाज्ञायुस्वेतिदोग्धारंप्रेष्यति। ततएवंप्रेषि
तोदोग्धागांदोग्धि। आपस्तंवः॥ नशूद्रोदुह्यातदुग्धादारुपात्रेदोग्धीति॥
स्थाल्यन्वाहदेवस्त्वासिच्यमानेजपति। स्थाल्यामन्वारब्धेयजमानेदो
हानंतरंदोग्धारंदोहनपात्रेणावस्थाल्यामासिच्यमानेपयसिदेवस्त्वेत्यमुं
मंत्रमध्वर्युर्जपति॥ काम[illegible]दोहानंतरंदो[illegible]धु [illegible]इतिप्रश्नः। कामाधुक्षः
कांगांदुग्धवानसीत्येवंदोग्धारंप्रतिप्रश्नःकर्तव्यः॥ प्रोक्तेसाविश्वायुरि
त्याह। दोग्धाअमूमितिगोनाम्निप्रोक्तेअध्वर्युःप्रतिकथितेध्वर्युःसावि

Indira Gandhi National
Centre for the Arts

श्वायुरित्यमुं मंत्रं ब्रूयात्॥ एवमितरेऽन्नराभ्याप्रतिमंत्रे। एवमेवञ्जनेनैवप्र
२६ कारेणागंधुस्वेत्यादिना इतरे द्वे गावौ दोहयति। इयांस्तु विशेषः। सा विश्वा
युरित्यस्य स्थाने गोनामकथनानंतरं ऽन्नराभ्या सा विश्वायुरित्यस्मान्मंत्राद
नंतरं पविताभ्यां मंत्राभ्यां सा विश्वकर्मा सा विश्वधायाः इत्येताभ्यां प्रतिमं
त्रमेकैकामभिदध्याति। सा विश्वकर्मेति द्वितीयां। सा विश्वधाया इति तृती
यां। एवं शब्देन प्रेषादि सर्वमतिदिश्यते तेन दोहनप्रेषः। दोहनं। स्थाल्याम
न्वारब्धायामासेकः। आसिच्यमानजपः। नामप्रश्नः। तत्कथनं मंत्राभिधा
नं चेति॥ विसृष्टः वा[illegible]गुन्नराभ्रन्वारब्धे। तिसृणां दोहनानंतरं विसृ २६

ष्टवागक्षुरुन्नरा गा दोहयति पूर्ववत्॥ तत्र विशेषः। स्थाल्यामनन्वारब्धे यजमाने दो
ग्धा पयः आसेवति। ततो गां धुस्वेति प्रेषः। दोहनं॥ आसेकजपौ। एतावदेव वारत्र
यं भवति। ऽन्नरा इत्यत्र बहुवचनश्रवणात् ज्ञस्वा संदेहे निर्णयार्थमाह॥ ॥याव
त्स्वमधिकाराः॥ यावत्यः स्वा आत्मीयाः यावत्स्वा यावदवधारणे इत्यव्ययीभा
वार्थे॥ यावत्य आत्मीया गावो भवंति त्रिप्रभृति तावतीः। सर्वा अपि दोहयतीत्यु
तः अधिकाराः। तावतीनां सर्वासां दोहने अधिकारो स्तीत्युक्तः॥ ॥तिस्रो वानि
त्यवात्। वा शब्दः पक्षव्यावृत्तौ। तिस्र एव दुह्यंते नाधिकाः। कस्मान्नित्यत्वात्॥ त्रि
त्वे बहुवचनस्य नियतत्वात्॥ ननु च उष्ट्रादौ वपि बहुवचनं नित्यमेव। तत्राह॥

Indira Gandhi National
Centre for the Arts

आदिसामर्थ्यान्नायद्यपिचतुष्टादावपिबहुवचनंनियतमेव॥ तथाप्यादिसामर्थ्या
त्त्रित्वगतमेवग्राह्यं।प्रथमातिक्रमेकारणाभावादितिया·यात्।तिस्रोदुग्धा
२२ तोवत्तेवशाश्रयस्यकृतत्वात्किमर्थमधिकानांदोहनं॥ ॥दर्शनाच्च॥नकेवल
मुक्तन्यायेनैवतिस्रोदुह्यंतेअपितुश्रुतोदर्शनाच्च।श्रुतोह्येवंदृश्यतेयथाबहु
वचनेनत्रित्वसंख्यैवपरिगृह्यतइति।तद्यथाअश्वमेधेशिल्पावैश्वदेव्यः।कल्मी
वाआग्नेय्यःश्येतावायव्याःश्येताःसौर्याइत्यत्रबहुवचनेनैवपशवोविहिताः।त
थाकपिंजलादयोपिप्रायेणबहुत्वविशिष्टाएवविहिताः।शतपथेचतेषांसंख्यो
पबंधनेश्रूयतेसप्तदशैवप्राजापत्यान्पशूनालभतषोडशषोडशेतरेषुत्रयोद

शारण्यानाकाशेष्वालभतइत्यादिसंख्योपबंधनेचत।दोषोपपद्यतेयदाबहु
वचनेनत्रित्वसंख्याविशिष्टाएवगृह्यंतेनाधिकाः।अतोत्रापितिस्रएवोत्समेदो
हनीयाः॥परिक्षालनमानयतिसंसृज्यध्वमिति।पश्चाद्गोदुग्धासेकानंतरंदोह
नमात्रस्यपरिक्षालनंप्रक्षालनोदकंस्थालीस्थदुग्धमध्येनिनयतिसंसृज्यध्वं
ऋतावरीरित्यनेनमंत्रेण।तच्चाध्वर्युः॥दोहमात्रेन्यस्योक्तत्वात्॥ ॥उद्वास्या
तंनक्तिप्राग्धुमातनक्तिप्रागिदंनहोमावशिष्टंदधिदुग्धमध्येप्रक्षिपतिदधित्व
संपत्त्यर्थइंद्रस्यत्वाभागमभिनिमंत्रेण।अत्रविप्रतिपत्तिः।केचिन्मातर्होमशेष
तशेषेणेंद्रस्यत्वेति।तांदुग्धस्थालीमुत्तरतउद्वास्यप्राग्धुनशेषेणपूर्वेदिनेकृताग्निहोत्रशेषेणदध्ना॥ २

णादग्नौ दुग्धमातनक्ति प्रा॰दिनहोमावशिष्टं दधि दुग्धमध्ये प्रक्षिपति दधि त्वमं
२८ पत्यर्थे इन्द्रस्य त्वा भागं॥ मिति मंत्रेण। अत्र विप्रतिपत्तिः। केचित्प्रातर्होमाशेषेण
तं च न कुर्वंति। केचित्प्रा॰दिनसायंहोमशेषेणेति। केचिदुभयहोमशेषेणेति। शा
खांतरे चोपवसथस्य पुरस्ताद्देवेह्यहे दातंचनस्योपकल्पनमुक्तमस्ति। अग्निहो
त्रोच्छेषेणादध्नातनक्तीति तद्दिने सायंहुतावशिष्टयवाग्वाः पिंडमवदध्याती
ति मानवे॥ आपस्तंबसूत्रे च॥ एकस्याद्वयोस्त्रिसृणां वैकाहे द्व्यहे चतुरहे वा पुर
स्तादुपवसथादातंचनार्थो दोहयित्वा तेन शीतदुग्धेनातनक्तीति। अग्निहोत्रोच्छे
षेणमच्चवधायेति च। अत एव चतुर्दश्यां रात्रौ दध्नाग्निहोत्रहोमः कार्य इति पत्नी २८

यतोकृतशेषश्च स्थाली स्वोपा सोनस्तु गातः॥ कश्चिदमावास्यापीयज्ञायं यवा
ग्वाग्निहोत्रं हूयते तच्छेषेणायवाग्वातं च न कुर्वंति। तदसंगतं तस्यातंचनार्थ
त्वाप्रसिद्धेः शाखांतरविरोधाच्च। शाखांतरे त्वग्निहोत्रोच्छिष्टेन दध्नातनक्तीत्यु
क्तं। तथाच्छेषणाभावे तंदुलैरातंच्यात्तदभावे ओषधिभिरिति। काठके च॥
यद्यग्निहोत्रोच्छिष्टं न विंदेत्तंदुलैरातंच्याद्यदि तंदुलान्न विंदेदोषधिभिरातंच्या
त्स णो वकुलकुवलवर्जमिति॥ ॥सोदकेनापिदध्यान्मृन्मयेन विष्णो इत्यमि
ति। आतंचनानंतरं सोदकेन जलनतोत्तानेन पात्रेण। अमृन्मयेन मृन्मयवर्जि
तेन दोहस्थाली पिदध्यादिति टीकायां। विष्णो हव्यमिति मंत्रेण। मानवे। सोदके
म

Indira Gandhi National
Centre for the Arts

धाति। नि

२८ नापि दध्यायवत्सापाकरणं पूर्ववत्। तां दोहस्थालीं सुगुप्ते देशे निधाय पूर्ववद्व
त्सापाकरणं कार्यं तच्च मातृभिर्वत्सान्संसृजत्यवत्सशाखयोपस्पृशति। वायवस्थे
त्यवमादि। अच्युतगामगोशाखापगूहनं न कुर्यात्। न च प्रातर्दोहार्थं वक्ष्यति।
हि निरुप्याज्यं प्रातर्दोहनमन्यस्मिन्निति। न पिवशाखया दर्भैर्वा सायंदोहवत्प्रा
तर्दोहाय वत्सान्नापाकरोतीति॥ ॥प्रातराग्नेय ऐन्द्रायश्च द्वादशकपालो सन्नय
तः। प्रातः प्रतिपदि दर्शेष्टौ विशेष उच्यते। आग्नेयोऽष्टाकपालः पुरोडाशो भवति।
असंनयतः सान्नाय्यमकुर्वतो यजमानस्य द्वादशकपाल ऐन्द्राग्नः पुरोडाशो द्वि
तीयं हविर्भवति। असंनयत इति विशेषितत्वात्संनयत ऐन्द्राग्नो न भवति॥ राम° २८

निरुप्याज्यं प्रातर्दोहनमन्यस्मिन्। आज्यं निरुप्याज्यनिर्वापानन्तरमन्यस्मिन्निति
सायंदोहपात्रादन्यस्मिन्पात्रे प्रातर्दोहनं कर्तव्यं। अन्यस्मिन्नुक्त्वा सायंदोहस्य
तत्पात्रस्थस्यैवातञ्चनं। निरुप्येति पूर्वकालतमात्रे क्त्वादेशाय ल्यप्॥ न समान
कर्तृकतायां। निर्ज्ञातकर्तृकत्वात्। आपस्तवः॥ उपधायकपालानि सायंदोह
वत्प्रातर्दोहं दोहयित्वा तं च नापिधाने निधानं च निर्वर्तनमिति॥ ॥परिक्षालनं
तं कृत्वा सायंदोहमाहृत्य प्रातर्दोहे ९ श्रपयित्वा भिघार्योद्वास्योभावनक्रिया
पसृष्टां प्रवृत्तादित्यादि परिक्षालनमानयतीत्यन्तं सायंदोहवत्कृत्वा ततः प्रा
तर्दोहं देवस्त्वेति मंत्रेण। श्रपयित्वा ततः सायंदोहमाहृत्य प्रातर्दोहमेवाभिघा

Indira Gandhi National Centre for the Arts

यितनस्य मुह्वास्यपुरोडाशांजननानंतरं यस्ते प्राण इति मंत्रेण सोमायं प्रातर्दोहो
३० क्रमेणानक्ति अत्र प्रातर्दोहः अपसिच्याभिघार्येति प्रातर्दोहस्यैवाभिघारण
विधानात् अंजनेऽभावितिविशेषोपादानाद्वाभिघारणं पयस एव न दध्न इति
प्रतिप्रतीयते अंजनंतु प्राणदानमेव प्रकृतावर्थनक्तियस्ते प्राण इत्युक्तेः ॥अ
८४ त्र प्रोदानादयः संस्काराः प्रथमं दध्नः कार्यास्ततः पयसः अथवानंतु पयसः
पूर्ववचनात् ॥ ॥शृतस्याग्रे दघ्नीति श्रुतेः शृतस्य दुग्धस्य प्रथममवद्यति
जुह्वामवदानकाले ॥ ततो दध्नः ॥ कृत एवं स्रुक्रमेणावदानं इति श्रुतेः शृत
स्य दुग्धस्य प्रथममवद्यति जुह्वामवदानकाले ततो दध्नः कृत एवं रोवद्य ३०

तीत्येवं विधायाः शाखांतरीयायाः श्रुतेः न्यायविरुद्धत्वाच्छ्रुत्युपादानं । दध्नो हि प्र
थमम् अनुमंत्रणमिति । दधिपयसोः स्रुवेणाहिरवदानं प्रत्येकं । तत्रैव पस्ताराभिघा
रौ । सहप्रदानं च देवता देवता गुणाधारैकत्वात् ॥ तदुक्तं न द्रव्यभेदे गुणभेदोऽपि
तिवास्येति ॥ स्रुवेणाज्यसांनाय्ययोरवद्यतीत्यापस्तंबः ॥ ॥ समस्य मार्जनं
शाखापवित्रं प्राणीतासु निहितं पवित्रे च समस्य भक्षणं तयोन्मार्जनं विहितं तत्क
र्तव्यं ॥ मार्जनानंतरं दशाखापवित्रं शाखायामेव कर्तव्यं प्रस्तरे करणं तु त
न भवति इत्युक्तं प्राक् ॥ इंद्राग्न्योरिति वृहनं इंद्राग्न्योरारु ज्ञितिमित्यनेन मंत्रे
णाक्रम्य वृहनं भवति ननु च यथा देवतमेन्यादित्युक्तत्वात्र वक्तव्यमेतत् ॥
मत्यं इंद्राग्न्योरित्यस्याभावास्यायां विनियोगज्ञापनार्थत्वात् अन्यथाप

Indira Gandhi National
Centre for the Arts

रादिना पूर्वोत इतिपरिभाषितत्वादिंद्राग्न्योरित्यस्य मंत्रस्य पूर्वमंत्रशेषता
३१ स्यात् तन्माभूदित्यत उक्तमिंद्राग्न्योरितिऋूहमिति ॥ ॥सहशाखया प्रस्तरा
नुप्रहरणं । यदा सूक्तवाकांते प्रस्तरानुप्रहरणं क्रियते तदा शाखया सह कर्त्त
व्यं प्रस्तरेण सह वत्सापाकरणार्थशाखाया आहवनीये प्रक्षेपः कार्यः ॥
परिधिभिः सहोपवेषं जुहोति जुहोमि त्वेति । यदा परिधिभिः सहैव विरो
धादनीत्वा शाखा पूलादुत्पादितमुपवेषं जुहोति जुहोमि त्वेति मंत्रेण । प्रतिप
त्तिरियं चारितार्थत्वात् ॥ नाशादोषादौ सक्त्वाहीतेनाज्येन होमः ॥ शाखा स्वोप कृ
वेषस्य न होमः ॥ पौर्णमासप्रकरणेऽपवेषहोमस्याविधानात् ॥ ॥पौर्ण ३१

मासवदन्यदमद्याः ऽक्तादन्यत्सर्वं पौर्णमासवद्भवति । एतावान्विशेषः । अम
द्यः । पौर्णमासेनु सद्यो वा प्रातरिति पक्षे अन्वाधानादिकर्मापवर्गापवर्गौ
तस्य यत्तस द्यस्त्वमुक्तमस्ति तद्दिदनं भवति ॥ ॥सोमयाजीनमेतः ॥ सोमया सं
जी समन्नयेत ॥ सोमयाजी समस्ये सान्नाय्यं दधि दुग्धरूपं द्विविधं यममावा
स्यायां कुर्यात् ॥ सोमेनाग्निष्टोमादिना यइष्टवान् स सोमयाजी तस्य सान्ना
य्यनियमः ॥ ॥कामादितरः ॥ तस्मादथ सोमयाजी समवनयेदिति श्रु
तेरितारः सोमयाज्यपि कामादिच्छया सन्नयेत ॥ अमावास्यायां सान्नाय्यं
हविः कुर्यात् ॥ ॥त्रिंशतं वर्षाणि दर्शपूर्णमासाभ्यां यजेत ॥ उक्ताभ्यां

Indira Gandhi National
Centre for the Arts

दर्शपूर्णमासाभ्यां त्रिंशतं वर्षाणि यजेत। ततऊर्द्धं न यजेत। तस्मादु त्रिंशत
३२ मेव वर्षाणि यजेत। ततिकृते सान्नाय्यस्य प्रस्तुतत्वात्सान्नाय्योरेव दर्शपूर्णमा
सयोरयं नियमः स्यात्समाभूदिति तयोः प्रस्तावेपि पुनर्दर्शपूर्णमासग्रह
णं॥ ॥पंचदश दाक्षायणयज्ञी। दाक्षायणयज्ञी। दाक्षायणयज्ञसंज्ञके
दर्शपूर्णमासयाजी पंचदश वर्षाणि यजेत। न त्रिंशतं वर्षाणि यद्यकृदाक्षा
यज्ञी स्यात्तदयो अपि पंचदशैव वर्षाणि यजेतेति श्रवणात्। दर्शपूर्णमासा
वेव गुणविकृतौ दाक्षायणयज्ञो न तु ततः कर्मान्तरमित्युपवेक्ष्यति गुणवि
धानं वा सन्निधिसंपद्भ्यां नाम्नाभ्यामिति॥ ॥अग्निहोत्रमेव वा जुहुयात्॥ प्रा ३२

कृतदर्शपूर्णमासपक्षे त्रिंशद्धीनं तरं दाक्षायणयुक्तदर्शपूर्णमासपक्षे
पंचदशवर्षानंतरं च केवलमग्निहोत्रमेव जुहुयान्नान्यत्किंचिदनुकुर्यात्। कोदि
देवश हामिवाधियावच्छते। अग्निहोत्रमिलवा जुहुयात्॥ यथाग्निहोत्रं याव
ज्जीवं जुहुयात्। तथा दर्शपूर्णमासावपीति। उभयत्र यावज्जीवमनुष्ठान
श्रवणात्॥ यावज्जीवं दर्शपूर्णमासाभ्यां यजेत। यावज्जीवमग्निहोत्रं जुहु
यादिति। अतस्त्रोभयथा श्रवणान्न विकल्पः। यावज्जीवं दर्शपूर्णमासयागः
कार्यः त्रिंशद्वर्षाणि वा। दाक्षायणपक्षे पंचदशवर्षाणि वेति॥ अत्राहाप
स्तंबः॥ स्वर्गकामो दर्शपूर्णमासाववैककामः सर्वकामो वा युगपत्काम

Indira Gandhi National
Centre for the Arts

येनाहारपृथक्त्वेन। यावज्जीवं यजेत त्रिंशतं वर्षाणि जीर्णो वा विरमेदिति। अ
३३ त्र यावज्जीवादिस कल्पः दर्शपूर्णमासोपरमेत द्विकाराणामप्युपरमः तत्प्रकृ
तित्वात्। दर्विहोमाग्रयणं क्रियते॥ सोमानामपि निवृत्तिः केवलमग्निहोत्र
मित्युपदेशः। अग्निहोत्रमवजुहुयादिति हि कात्यायनमिति। धूर्तस्वामी॥
आचार्याणामधर्मिको दर्शपूर्णमासावुक्तौ॥ अथ तद्विकारानिष्टिपश्वादी
त्वदिष्टश्सोयं चरुं निर्वपेदग्नीषोमीयं जमालभेतेत्येवमादीनां विकृती
नां चोदनानां यजतित्वनिरूपणपूर्वकं तदुपयुक्तां सामान्यातिदेशविशे
षातिदेशोहवाधान् विकृतिकालं च निरूप्य दाक्षायणयज्ञं वक्ष्यति। ननु ३३

दाक्षायणयज्ञो ह्यनेन तमतिदेशादिनिरूपणीयं तस्यापि गुणमात्रविकृत
दर्शपूर्णमासत्वेन प्रकृतित्वात्। सत्यं। दाक्षायणयज्ञे पयस्या विद्यते। आमा
स्यायां पयस्या मैत्रावरुणीति। तस्याश्च सान्नाय्यपयोविकारत्वादतिदेशा
दिनिरूपणाधीनात्तत्र पयोधर्माणां प्राप्तिः। तत प्राग्दाक्षायणयज्ञादतिदे
शादिनिरूपणं युक्तं॥ इदानीमिदं विचार्यते। सोयं चरुं निर्वपेत् ब्रह्मवर्चस
कामः। अथ वा हैस्य त्वं चरुं नैवारं सप्तदशशरावं निर्वपति। अथ सारस्वतं च
रुं निर्वपति। अथैतं वायव्ये मिथुनौ तूपरौ रूपरमालभेत स एतमाग्नेयं धू
म्रमालभेत अग्नीषोमीयमजमालभेतेत्येवमाद्यासु विकृतीषु चोदना

Indira Gandhi National
Centre for the Arts

त्रुकिंव्रीहीनवहन्तिव्रीहीन्प्रोक्षतीतिवद्यावदुक्तंनिर्वापालंभभूपसंस्कारमात्रवि
३४ धिरिति।तत्रधर्मस्यगृह्यलमूलत्वाद्दशाहमनपेक्ष्यस्याक्षितिन्यायेननिर्वापलं
भमात्रेप्राप्नोतीत्यतआह॥४कर्मेशद्वाद्रव्यदेवतायुक्तामजन्तिः द्रव्यदेवतायु
क्तः कर्मेशद्वाःक्रियाशाह्याख्यातप्रत्ययांतोनिर्वपत्यादिःशद्वोयजतिःप्रत्य
यांतोनिर्वपत्यादिःशद्वोयजतिः प्रत्येतव्यः।यागोज्ञेयइत्यर्थः।ननत्वसौर्यं
चरुमग्नीषोमीयमजमित्यादौद्रव्यदेवतासंयुक्तोनिर्वपदा [illegible] तित्यादितिङ्प्र
त्ययांतःशद्वोयागाभिधायकोननिर्वापालंभरूपसंस्कारमात्रविधायक
इतिज्ञेयं।यद्यपियजतिरितिशद्वोयजिधातुमेवाभिधत्तेदृक्ताथोपात्त॥ ३४

सेवाभिधत्तेइत्युक्तंनिर्देशादितिस्मरणात्।तथायत्रतदर्थयागप्रयोज्ञेयः।धातो
द्रव्यदेवतासंयोगाभावात्।तदर्थस्ययागस्यतुद्रव्यदेवतासंयोगः।एतत्का
रणोवाभिहितोयज्ञेथास्यास्यामोद्रव्यदेवतात्यागइतिदेवतोद्देशेनद्र
व्यस्यत्यागः सयागइति।नकेवलंसूत्रकारेणैवद्रव्यदेवतायुक्तस्यनि
र्वपेदालभतेत्यादिकस्यकर्मशद्वस्ययागविधायकत्वमुच्यतेकिंतुश्रुति
रपिनिर्वपत्यादौशद्वेश्रुतेयागंदर्शयति।अथमैत्राबार्हस्पत्यंचरुंनिर्व
पतीत्युपक्रम्यतयोरुभयोरवघः माहमित्राबृहस्पतिभ्यामनुब्रूहीत्या
श्राव्याहमित्राबृहस्पतीयजेतिवषट्कृतेजुहोतीतिसदानुवावनेविधि

Indira Gandhi National
Centre for the Arts

७२

परेवाक्येयागं दर्शयति। तथा वाजपेयपशुषु। अथ सप्तदश प्राजापत्यान्प
शूनालभत इत्युपक्रम्य प्रजापतय इत्युपांशु श्यामाश्छागानां हविषोनुब्रूही
३५ ति प्रजापतय इत्येवोपांशु श्यामाश्छागानां हविः प्रस्थितं प्रेष्येति वषट्कृते जु
होतीति। तथाग्नीषोमीये अथाहाग्नीषोमाभ्यां छागस्य हविषोनुब्रूही
त्याश्राव्याहाग्नीषोमाभ्यां छागस्य हविः प्रेष्येति वषट्कृते जुहोतीति प्रैष
विशेषविधिपरे वाक्ये यागं दर्शयति। ननु यत्र निर्वापादौ विहिते यागो
दृश्यते तत्र तथा भवतु। अन्यत्र न भविष्यतीति शंकायां। समानन्यायेन
तु दनपूर्णास्याल्पा एकमिच्छा श्रुतज्ञानेन सर्वेषां श्रुतज्ञानवदन्यत्रापि ३५

तथा कल्पनात्। तस्मादेवमादौ यागविधिरिति। एवं यागत्वे सिद्धेपि इदं
संदिह्यते। सौम्यं चरुं निर्वपेदग्नीषोमीयमजमालभेतेत्यादौ किं यागमात्रं
भवति उत धर्मोपि भवतीति। यदा च धर्मो भवतीति पक्षस्तदापि संदेहः किं
पूर्णाहुतिसंबंधिनो धर्मा भवंति उताग्निहोत्रसंबंधिनः। आहोस्विद्दर्शपू
र्णमासयोः। अथ ज्योतिष्टोमस्येति। अथवा दर्शपूर्णमासयोरेवेति।
किं प्राप्तमिति। धर्माणामनाम्नानाद्यागश्रुतं यागमात्रं कर्त्तव्यमिति। ए
वं प्राप्ते आह। दर्शपूर्णमासधर्मा इष्टिपशुषु सामर्थ्यात्। सोमादौ ध
र्मा भवंति न यागमात्रं। कस्मात्। सामर्थ्यात्। एवमेतानि विधिवाक्या

Indira Gandhi National Centre for the Arts

३६ निसमर्थाच्चधर्मविंतिसप्रयोजनानिभवंति।अन्यथासाकांक्षत्वादर्थप्रतिपा
दनाभावेननिरर्थकान्येवस्युः तथाहि।सौर्यणायामेनब्रह्मवर्चसंभावये
दित्यत्रांशत्रयवतीभावनाविधीयते।किंकेनकथमिति।तत्रकिमंशाब्रह्म
वर्चसं।केनांशः।सौर्येणेति।कथमंशस्तुवाक्यमध्येनास्तितेनकथंभाव
येदितिदाकांक्षकथमंशसापेक्षा।यच्चसापेक्षंभवतितदध्याहारेणानुषं
गेणवापूरयित्वानिराकांक्षंकर्तव्यं।।अन्यथातस्यानर्थक्यापत्तेः।नच
वेदेमात्रामात्रस्यापितदिष्यते।तस्मादत्रनिराकांक्षीकरणायविध्यंते
तिकर्तव्यतापरमर्थीयःकथमंत्राः कस्यचि वस्तुषंजनीयइतिसिद्धेत्रा ३६

रा॰वि॰भु॰१

हादर्शपूर्णमासधर्माइष्टिपशुष्विति।सर्वासुअग्नीषोमीयपशौचदर्शपूर्ण
मासयोरेवधर्माभवंति।नशूर्णाकुन्यादेः कस्मात्सामर्थ्यादितिपूर्वोक्तएव
हेतुरत्रापियोज्यः।दर्शपूर्णमासधर्माएवसौर्यादिविकृतीनांशेषीभवितुंस
मसर्थाः।चरुपुरोडाशदयोघ्रवदानादिभिरनभि[illegible]च्यंतिनाभिघर्वादिभि
रिति।किंचच।यत्कचोदितत्वेनहितेनदेवतानिर्देशं॰षपद्दयकत्वेमि
त्याहीनिदर्शपूर्णमासाग्नेयादिचोदनयादिचोदनयादृष्टसंबंधानिसा
र्थवाक्येनिध्यंतोपेक्षेदृश्यमानानितांचोदनामुपस्थापयंति।।साचस्वा
र्थमुपस्थापयति शत्रयवतीभावनाचतस्याःस्वार्थःततःकिमशकेनांश

Indira Gandhi National Centre for the Arts

केनांशयोरिह समत्वात्तावता हेत्वकयमंशो विध्यंतधर्मोपरपर्यायो गृह्यते । एवं
३८ सौर्यादिविधीनां आग्नेयादि- विधिसारूप्याद्दर्शपूर्णमासधर्मप्राप्तेव सौर्यादि
षु भवंति नाग्निहोत्रादीनां सारूप्याभावादिति । इष्टिपशुष्वित्यत्रेष्टिषु सर्वासु
पशौ चाग्नीषोमीये एकस्मिन्निति व्याख्येयं । पश्वंतरेषु त्वग्नीषोमीयाद्धर्मा भवं
तीति सूत्रकारो वक्ष्यति अग्नीषोमीयान्यपशुष्विति ॥ ॥ दर्शनाच्चानके वलसा
मर्थ्याद्दर्शपूर्णमासधर्मा इष्टिं निर्वपतीत्युपक्रम्याप्यधीते तस्य प्रयाजेषु ताय
मानेषु ब्राह्मणो वीणागाथी दक्षिणतोऽन्तरमंद्रामुदाघ्नन्निमाः स्वयं संभृता
गाथा गायतीति । आस्यामिष्टौ प्रयाजेषु ह्रूयमानेषु ब्राह्मणस्य गाथागानं वि ३८

धीयते न च प्रयाजाः तत्र प्रकृतितः प्राप्ता एवानूद्यंते । अतो विकृतिरूपायामपि
त्रेष्टौ प्रयाजानां दर्शनादथैवं ज्ञायते यद्दर्शपूर्णमासधर्मा इष्टिषु भवंतीति । त
था प.शौ सऽन्तरमाघारमाघार्यास९ स्वर्शयच्छ्रुवेणोपर्यत्यनुह्वाय पशुं ९ समन
क्तीति पशुसमंजनविधि परवाक्येऽन्तराघारं दर्शयति । अतः पशावुत्तरा
घारदर्शनादेवं ज्ञायते यद्दर्शपूर्णमासधर्माः पशौ भवंतीति । तदेवं प्रकृ
तिवद्विकृतिः कर्तव्येत्येवंरूपेणानुमानिकवचनेन सर्वेष्टिषु दर्शपूर्ण
मासधर्मा भवंतीत्युक्तं । अधुना तदपवादत्वेन प्रत्यक्षशब्देन धर्मप्राप्तिमा
ह ॥ वैश्वदेवधर्माश्चातुर्मास्येषु वचनप्रवृत्तिभ्यां । चातुर्मास्येषु व त्वाग

Indira Gandhi National
Centre for the Arts

रिपर्वणि प्रसेति ॥ वैश्वदेवं ॥ वरुणप्रघासाः साकमेधाः शुनासीरीयं चेति ॥ तत्र प्रथ
३९ मं वैश्वदेवपर्वणि दर्शपूर्णमासधर्मा भवंति । ततोतिरिक्ताङ्गोपदेशिकाश्चापिध
र्मा भवति । प्राचीनप्रवणत्रेधा वर्हिः । कुशप्रस्वः प्रस्तरो हतवासा पत्नी चेत्येवमाद
यः । तच्च वरुणप्रघासादिषु त्रिषु पर्वसु वैश्वदेवस्य धर्मा भवंति । कस्मात् ॥ वचना
त् । प्रकृतेश्चेति द्वाभ्यां हेतुभ्यां । वचनादित्ययमुपदेशो हेतुश्च ॥ तेन यत्र यत्राथैता
न्येव पंचहवींषि भवंतीति वचनं ॥ वरुणप्रघासेषु वर्युकर्तृकं तत्र ॥ महाहवि
षि शुनासीरीये च । तत्रैव वैश्वदेवधर्माः प्राचीनप्रवणतादयो भवंति नान्यत्र मा
रुत्यनीकवतीसांतपनीयागृहमेधीयाक्रीडिनीष्ट्यासु । अत एव मारुत्यादिषु ३९

प्राकृतमेव वर्हिरेकधा सन्नद्धं न त्रेधा प्रस्तरोपि प्राकृत एवानप्रस्वः । प्रत्यक्षवचनाति
देशोयं । अथैतान्येव पंचहवींषीति । एतान्येवेत्येतच्छब्देन पूर्वोक्तानि सवाश्रमेषा ।
ष्टाकपालेत्यादीनि पंच वैश्वदेवपर्वविहितानि हवींषि परामृश्यन्ते । तानि च वैश्वदे
वपर्वणि उपक्षीणानि प्रधानयागान्विष्टकृत्प्राशित्रेडाभागाच्चतुर्द्धाकरणैः सर्वा । म
णपपि व्ययीकृतानि । अतोनेन वाक्येन तानीत्येतद्धर्मकाणीति विधीयते । किंच । प्र
तेश्च । अतोऽस्मात्तो शुनासीरीयधर्मोपदिष्टः निदर्शनाद्वा तस्माद्वन्नापि किंतु तत्र वेदिं न
दृष्टेति प्रमदास्पेनमधत्यग्निमिति मंथनप्रतिषेधतिप्रतिषेध प्राप्तिपूर्वको भ
वति ॥ उत्तरवेदिः प्रमदास्पये । त्कवैश्वदेवेष्वभावात्तयोः । प्रतिषेधा नित्यानुवादः ।

४० ननु अग्निमथनमपि स्तुताः सौरीये विहितमस्ति ॥ तेषां चैव चतुर्भिर्मथंतीति । सत्यं ।
न मथ्यन्ते अग्निमिति निषेधोऽपि विद्यत एव । अतएव यथा अर्वाणं त्वा दशग्रहाणां ग्र
हा वक्ष्यति सौरीये अग्निमथनस्य विकल्पः सिद्धो भवति ॥ एवं प्रत्यक्षवचनातिदेश
मुक्त्वा नामातिदेशमाह ॥ ॥ सोमाद्यावभृथः सामप्रतिषेधात् । अवभृथे वरुणप्र
घासं संज्ञं चित्य अवभृथसंज्ञके कर्मणि सौत्रामण्यां दार्विहोमप्यवभृथं च सामान्तं सा
मिकादवभृथाद्धर्मा भवति । कुतः । सामप्रतिषेधात् । तत्र न साम गीयत इति सा
मगानस्य प्रतिषेधात् ॥ सामगानं तु सोमिकावभृथ एव विहितमस्ति । तस्मात् प्रतिषेध
अतदैवत्यमपि यत्तद्दिसोमिकादवभृथाद्वारुणप्रघासमिकावभृथे धर्मा भवेयुः ४०

वकारो वचनप्रवृत्तिः स्याम् । तस्य हेतोरनुकर्षणार्थः । कुच्यते । मिश्रीयते ने
ने नशहेन तिवचनेन सदमुवात । अवभृथ इत्येवं रूपा ॥ तेनावभृथ इति ना
म सामान्यादत्र सोमिकादवभृथाद्धर्मप्रवृत्तिर्भवति । धर्मप्रवृत्तिरपि साम प्र
तिषेधात् ज्ञायते । तस्य प्राप्तिपूर्वकत्वात् । तेनोरुढहीति वाचनादि सर्वं त
त्रीप भवति षड्वर्जं । एवं केन पाणिनामयनेमासमग्निहोत्रं जुहूति दर्शपूर्ण
मासाभ्यामासे वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेत तस्मात् सर्वत्र नामधे
यादहर्मप्राप्तिर्ज्ञेया ॥ ॥ काण्वयशानमत्रापदेशात् । तयो एवास्य कारणा
रितिवचनेन पशौ काण्णास्मनवत्कपाना धोवः हृस्वाजिनं हविरागास

Indira Gandhi National
Centre for the Arts

नमारांकम तिष्ठति। पशोकणावद्भिरपासनेन भवति। कस्मात मंत्रोपदेशा
त। यद्दिच तथा एवामृगान्यतेनमर्दस्याः द्वकणापासनेति कर्त्तव्यतायाः प्राप्तिः
४२ स्यात। तदारस्तसमाभागासीति पुनर्मंत्रोपदेशो न स्यात। मंत्रस्यापि प्राप्तत्वात।
प्रिवकपुनर्मंत्रोपदेशः। तथा एवामृक्वपशारस्तसोभागासीति। तस्माद्भिरु
पासनमात्रमेव नवति॥ ॥विशये लौकिमयुत्वात।। यत्र कर्मणि विशयः
संशयो भवति किमत्रालौकिकं वस्तुग्राह्यमुत वैदिकमिति॥ तद्यथा। उभया
भावेन्कुषीं हिरण्यं वोपसुपरिधारयन्निति॥ तथा गार्गत्रिरात्रेश्रान्या दोह
षु सामसृग्निमुपनिधायस्तुवत इति। तत्रेन्कुष्याद्यो कि लौकिकाग्नयो ग्राह्याः
उत वैदिका गार्हपत्यादिरिति विशये। एवंविधे संदेहे सति लौकिकमेवा ४२

ग्निं ग्रहीयान्न वैदिकं गार्हपत्यादिकं। कुतः। अयुक्तत्वात्।। लौकिकस्याग्नेः कुत्रापिवा
क्येनाविनियुक्तत्वात्। इदं तरस्य गार्हपत्यादेर्वचनेन कार्यांतरविनियुक्तत्वात्। गार्ह
पत्ये हवींषि श्रपयति आहवनीये जुहोति दक्षिणाग्नावन्वाहार्यं पचतीति। नन्व
न्यवाऽयुक्तत्वादन्यत्रापि तत्कार्थं इत्यनेनैव सिद्धेरनारंभणीयमिदं विशये लौकि
कमिति सूत्रं॥ स्तोत्रवेलायांतस्य ह्वलयेयुः। तमनुमंत्रयतोग्निरसीति। अतश्रान्य
दोसामग्निरत्रानुदाहरणं। अन्यदेवोदाहरणं प्रदर्शनीयं मंतव्यं॥ तद्विप्रकरणा
वगतसवीर्यत्वस्य दुग्धस्याप्रकरणाविहितातिरिक्तकार्यसाधनता निराकरणपरं
।।ऽदंतु गार्हपत्यादीनां सामर्थ्यात्कर्वेयत्वेप्राप्तवाक्यवोधितहविःश्रपणादिका

Indira Gandhi National
Centre for the Arts

यीतिरिक्तकार्येषु तेषां साधनतां निशाणापयितुमिदमाह । त्रिषु त्वग्नौ त्रिरात्रे आज्य
४२ दोहानि सामानि संति । आज्यदोहानामग्निमुपनिधाय स्तुवतइति । तत्र चोदितात्र
विशेषः । ब्राह्मणमाज्यदोहानामग्निमुपनिधाय स्तुवतइति होतुर्धिष्ण्याग्निं धार
येयुः प्रथमेहनि यं मध्यंदिन आनयेयुः । माध्यंदिने धिष्ण्य धाग्निविहरणकाले
यमानयेयुस्तं धारयेयुर्यावदाज्यदोहकालइति तत्र द्यामेव आज्यदोहं । तथा
प्रातःसवनउत्तरयोः उत्तरयोर्द्वितीयतृतीययोरह्नोः प्रातःसवने धिष्ण्य धा
ग्निविहरणोयदा तद्धिष्ण्य आनयेयुस्तं धारयेयुर्यावदाज्यदोहकालइति तयो
र्हि माध्यंदिने आज्यदोहाः इष्टिषु पशौ च दर्शपूर्णमासवद्धर्मा भवंतीत्युक्तं । दर्श ४२

पूर्णमासवद्धर्मा भवंतीत्युक्तं । दर्शे च आग्नेयादयः षट्प्रधानयागाः । तत्रायं संदेहः
किं यत्रकुत्रचिद्विहितेन यागेन नियमेनयतं कुतश्चिदाग्नेयादेर्धर्मा भवंति । उतास्मि
न्नस्मादेवेति नियमइति । तत्र नियमकारणाभावादनियमप्राप्त आह ॥ ॥ वि
धिविशेषः कर्मण्येकद्विशब्दपरिमाणद्रव्यदेवतागुणसामान्येभ्यः । कर्मणि
वैकृते प्रधानकर्मण्येकद्विशब्दपरिमाणद्रव्यदेवतागुणसामान्येभ्यः का
रणेभ्यो विधिविशेषो भवति । अस्मादेव प्रकृतात्प्रधानयागादस्मिन्वैकृ
ते प्रधानकर्मणि धर्मा भवंतीत्येवं विधिविशेषो भवतीत्यर्थः । विधेरिति
कर्त्तव्यताविधिर्विशेषो विधिविशेषः । सामान्यशब्दः प्रत्येकमभिसंबध्यते ॥

Indira Gandhi National Centre for the Arts

४३ एकहीति भावप्रधानो निर्देशः। तत्र च एकत्वसामान्यतः। द्वित्वसामान्यात् शब्द
यरिमाणसामान्यात् इन्द्रसामान्यात्॥ देवतासामान्यात् गुणसामान्याच्चेति हि
हेतुविभागः। यथा भवेमे तेभ्यो हेतुभ्यो विशेषणात् धर्मप्राप्तिर्भवति। तद्यथा च
कृते एकदेवत्यसौम्यसारस्वतपौष्णवारुणादीयागे एकदेवत्यत्वेनावान्तर
सामान्येन प्राकृतादाग्नेययागाद्धर्मा भवन्ति। तेन सर्वेष्वेकदेकदेवत्येषु चतु
र्धीकरणाद्याग्नेयधर्मा भवन्ति। यद्यपि प्रकृतेनादनाऽग्नेयपदद्रव्यकत्वादिसा
मान्यं अग्नीषोमीयादिषु अस्ति तथापि गुणाय एकदेवत्यत्वमवान्तरसामान्य
मधिकं॥ तेनैवं नियमः आग्नेयादेव तिना ग्नीषोमीयादेरिति। सदृशं हि दृष्ट्वा ४३

सदृशाद् इति मन्वते तत्र सदृश्यात् धर्मत्वमनुमीयते। तद्यथा एकस्मिन्न
भ्यासे तन्महिष्याद्दोशीघ्रगतित्वादिगुणयुक्तप्रथमं ज्ञातं यदा पश्चात्तत्सदृश
मेवाश्वादिकं दृश्यते तदा तस्य पूर्वदृष्टाश्वादिसदृशगुणत्वं कल्प्यते सा दृश्या
त्। तथात्रापीत्यर्थः। यथा वा। सतिकर्त्तव्यताके व्रीहितंडुलोदनपाके ज्ञाते श्या
माकगवेधुकतंडुलाद्योदनपाके अनुपदिष्टेतिकर्त्तव्यताके पि ओदनपाकसा
म्यात् व्रीहितंडुलोदनपाकेतिकर्त्तव्यता यथा कल्प्यते तद्वदत्रापीत्यर्थः। तथा
द्विदेवत्यत्वसामान्यादाग्नावैष्णवे अग्नीषोमीयस्य धर्मा भवन्ति। ननु हि देवत्य
त्वसामान्यमैन्द्राग्नेऽपि विद्यते। ततश्चानियमो भविष्यत्यग्नीषोमीयादैन्द्रा

ग्राह्येति॥ सैवं। शब्दपरिमाणसामान्यमधिकमग्नीषोमीये ऐन्द्राग्नात्॥ शब्दपरि
४४ माणसामान्यं च तुल्यसंख्याक्षरत्वं च। तथाग्नावैष्णवाग्नीषोमीययोरुभयोरपि
पंचाक्षरत्वरूपात्। अवान्तरसामान्यात् अग्नीषोमीयादेवाग्नावैष्णवधर्मा भ
वन्ति॥ नैन्द्राग्नादिति। अनेनैव शब्दपरिमाणसामान्येन मारुत ऐन्द्राग्नस्य धर्मा
भवन्ति भयोः पञ्चाक्षरत्वात्॥ नाग्नीषोमीयात्॥ तथा। द्रव्यसामान्यादपि त
त्सदृशे विकृते द्रव्यान्तरे धर्मप्राप्तिर्भवति। यथा औषधत्वसामान्यात्पुरोडाशध
र्माश्चरूणामय्यादिषु भवन्ति। सान्नाय्याद्ध्मसान्नाय्यपयस्यादिषु। द्रवत्वसा
मान्यात्॥ आज्यधर्मा मधूदकादिषु। श्लाणधर्मा मेषादिषु। देवतासामान्याद ४४

पि धर्मा भवन्ति। यथाग्नेये अ... आग्नेयस्य॥ ऐन्द्राग्ने ऐन्द्राग्नस्येति। नन्वेतत्सु
नरुक्तं॥ देवताकल्पादिना सिद्धत्वात्। मन्यो। द्रव्यदेवतानिराक्षे द्रव्यस्य सम
वायादिति वक्ष्यति। तदर्थं देवतासामान्यादिरुच्यते। अन्यथा द्रव्यदेवता
विशेषकृत्ये तस्य वक्तुमशक्यत्वात्। गुणसामान्यादपि विकृते प्रधानध
र्मप्रवृत्तिर्भवति। यथा प्राकृताद्रुपांशुयाजाद्विकृते सावित्र्यायां तावुपां
शुयागे। तेन प्रणवोपेयजामहो वषट्कारः संप्रैषाः प्रैषाश्चा तेरूपांशुहविः
षु देवतानामश्चपंचोपांश्चित्पदयोर्धर्मास्तेषु भवन्ति। यथा वा वैश्वानरया
गायोणिमास्याक्रिसमाणपोर्णमासायनधर्माः इति आरंभादयो भवन्ति

Indira Gandhi National
Centre for the Arts

॥अमावास्यायां क्रियमाणोच्चामावास्याभ्युदयधर्मोऽनुदितारंभादयो भवंति।
कौलो। ह्यत्रगुण इति। कालस्यापि कर्मार्थत्वेन परार्थत्वादंगत्वं भवत्येव तदु
क्तं जैमिनिना। शेषः परार्थत्वादिति॥ अथवा इदमुदाहरणं॥ द्वादशकपा
ले दब्धदेवत्रबैकदेवतत्वसामान्येनाग्नीषोमीयधर्मा ऐंद्राग्नधर्मा वा नि
यमेन प्राप्नुवंति। तत्र द्वादशकपालत्वरूपगुणसामान्यादैंद्राग्नस्यैव मा
नाग्नीषोमीयस्येति। शब्दपरिमाणसामान्यं त्वत्रैकस्यापि नास्ति। अथ द्र
व्यदेवताविरोधे चिंत्यते। यथा तिष्यायां॥ वैश्वानवकपालः पुरोडाशो वि
हितोऽस्ति॥ तत्र द्रव्यसामान्यात्पौरोडाशिकाधर्माः प्राप्नुवंति॥ देवतासामा ४५

न्याद्वैश्वदेवोपांशुयाजस्य धर्मा इति। यथा वा अग्निहोत्रसोमे पयसी अग्निहो
त्रयोगित्वादाग्नेयपयसि द्रव्यसामान्यात्सान्नाय्यस्य धर्माः देवतासामान्या
दग्नेयपु डाशस्येति। यथा राजसूये पंचबिले ऐंद्र एकादशकपालः पुरोडाशो
भवति इत्यत्र द्रव्यसामान्यात्पौरोडाशिकाधर्माः देवतासामान्यादैंद्रसान्ना
य्यस्येति। एवं द्रव्यदेवताविरोधे नियमकारिकारणाभावाद्द्रव्यसामान्या
द्वा देवतासामान्याद्वेत्यनियमे प्राप्ते आह॥ नियमो द्रव्यदेवताविरोधे
द्रव्यस्य समवायात् द्रव्यदेवताविरोधे द्रव्यस्यैव द्रव्यसामान्याद्देवधर्मा
भवंतीति नियमः। नानियमो द्रव्यसामान्याद्वा देवतासामान्याद्वेति। विरोधे

Indira Gandhi National
Centre for the Arts

द्रव्यसामान्यमेवबलीयइति।कस्मात्।समवायात्।द्रव्यं
४६ हिस्वरूपेणत्यज्यमानयागंनिष्पादयति।देवतातूद्देशमात्रेण।समयऽत्याद्द्रव्यसमा
म्नोबारेण।ननत्रोपकरोतिनद्रव्यंवस्वरूपेण।तेनप्रागस्यद्रव्यंसंनिकृष्टं।देव
तातुविप्रकृष्टा।संनिकृष्टविप्रकृष्टयोःसंनिकृष्टमेवबलवदितिन्यायेन
द्रव्यमेवबलवदितितत्सामान्येनैवधर्मप्रवृत्तिर्नदेवतासामान्येन।अथवा
द्रोद्रव्यस्यहृदयंविशेष्यत्वेनसमवायोदेवतायाश्चविशेषणत्वेन।विशेष
णविशेष्ययोर्मध्येविशेष्यमेवबलीयइतिन्यायाद्द्रव्यस्यबलवत्वं॥तेनवै
ष्णवेनवकपालेपुरोडाशवर्माएवभवंतिनापांशुयाजस्य।एवमाग्नेयेपयसि ४६

सान्नाय्यस्यैव॥ऐंद्रेपुरोडाशेपुरोडाशस्यैव।चरुसान्नाय्यालाभेत्वत्रापिद्रव्य
सामान्येनपुरोडाशस्यैव।नदेवतासामान्यात्स्यान्नापत्यावासान्नाय्यस्येत्या
दिज्ञेयं॥ ॥दाक्षायणेश्रूयते।मित्रावरुणीपयस्येति।तथावानुमीस्यपुवै
श्वदेवीपयस्येतिपयस्यावारुणीमाङ्गरुतीचेति।साचपयस्यादधिपयोभ्यां
निष्पाद्यते।तत्रोभयनिष्पाद्यत्वात्संदेहः॥किंमस्यांपयस्यायांदधिपय
स्योरुभयोर्धर्माभवंति॥उत्तदद्वः अथवापयस्यएवेतितत्राद्यंपक्षंमुद्भाव
यति॥ ॥आमिक्षायामुभयोस्त्रिवृत्तेः॥ ॥आमिक्षापयस्येतिचानर्था
तरं।आमिक्षायांपयस्यायामुभयोर्दधिपयसोर्धर्माभवंति।कुतःस्त्रिवृ

Indira Gandhi National Centre for the Arts

त्रेः॥ यतः स्वाभ्यामेव दधिपयोभ्यां कारणभूताभ्यामामिक्षा निर्वर्त्यते। निष्पा-
४१ द्यते॥ इमं पक्षं दूषयति॥ ॥नैकचोदनात्॥ यदुक्तं आमिक्षायामुभयोर्धर्मो
भवतीति तन्नाकुतः एकचोदनात्॥ एतदस्मै एकचोदना॥ मैत्रावरुण्या मि-
क्षेति। एकं हि पयस्याद्रव्यं विधीयते॥ मैत्रावरुणीपयस्यादेश्च दवीवारुणी
मारुतीत्येकवचनश्रवणात्। एकस्य चोभयधर्मत्वं न संभवति विरोधात्।
दधिधर्मत्वे हि अपरिशाभितयाशास्त्वयावसापाकरणं प्राप्नोति। पयोधर्म-
त्वे च परिवासितया तथा पयोधर्मत्वे च दोहनचतुष्टयस्यासादनं प्राप्त-
णां वशाप्नोति। न दधिधर्मत्वं। अत उभयधर्मत्वविरोधादन्यतरधर्मत्व ४१

मेव युज्यते। अथ द्वितीयं पक्षमुद्भावयति॥ ॥दध्नः संघातात्॥ आमिक्षायां
दध्नो धर्मो भवंति कुतः संघातात्। संघातः काठिन्यं। काठिनत्वसामान्यादित्य-
र्थः। दधिकाठिनं॥ आमिक्षा अपि कठिनेति। अथ सिद्धांतमाह॥ ॥पयस-
स्तद्भावात्॥ आमिक्षायां पयस एव धर्मो भवंति न दध्नः। कुतः तद्भावात् प-
यसो ह्यामिक्षा भवति। ननु दध्नोपि भवति पूर्वं प्रोक्तं आमिक्षायामुभयोस्त-
न्निवृत्तेरिति। तत्र घनत्वसंपादनायैव दध्नि निनयनं क्रियते॥ पयस्या-
तु पयस एव भवति॥ अथवा तद्भावात्॥ तद्रसस्य पयसो रसस्य मधुरस्या-
मिक्षायां भावात्। पयो हि मधुरं। आमिक्षापि मधुरेति। अतः पयस एव ध-

Indira Gandhi National Centre for the Arts

मीआमिक्षायांभवंतीतिसिद्धं।ततश्चदर्विहोमित्वाशास्त्रवयापवित्रेवंभावना
४८ नंतरंवत्सापाकरणं।दोहनचतुष्टयस्यासादनंप्रोक्षणंच आज्यनिर्वापानंत
रंदोहनंतरंदोहनत्रयाणामभिघारणंचेत्यादयःपदार्थाःपयस्यायाभवंति
॥अथाग्नीषोमीयपशोर्देवतासामान्यात्प्राकृताग्नीषोमीयपुरोडाशधर्मप्रा
प्तावाह॥ ॥पशोःसान्नाय्यस्यतदुक्तं।पशोः॥अग्नीषोमीयस्यपशोःसान्ना
य्यधर्मीभवति।नप्राकृताग्नीषोमीयपुरोडाशस्य।तदुक्तं।तद्यागेवोक्त
तद्यागेवोक्तंद्रव्यंदेवताविशेषद्रव्यस्यसमवायादिति।नन्वत्रकथंद्रव्य
देवतयोर्विरोधः॥इहहिपशुद्रव्यंविधीयतेनत्वप्रकृतानामिति।अतस्तत्क ४८

य्यधर्मानुस्थापयतीति।उच्यते।पशुस्तावत्पशोरुत्पद्यते।पयोहिपशोरुत्प
द्यते।अतःपशुद्रव्येप्रतीतंसान्नाय्यंबुद्धावारोहति।उक्तंसादृश्यात्॥अतः
पशुद्रव्यंसान्नाय्यधर्माणांप्रापकं॥अग्निसोमदेवतानुग्नीषोमीयेपुरोडा
शस्य।अतःकारणाद्द्रव्यमपिद्रव्यदेवताविरोधश्चैवभवति॥अतःसाधूक्तंन
दुक्तमिति।ननुतदीतेनैवसिद्धत्वात्पुनरुक्तमिदं॥मैवं॥तत्रहिवैमल्याद्दो
सान्नाय्यात्कृतमेवंपुरोडाशादिद्रव्यधर्माणांप्रापकं।इहहिप्राकृतसान्नाय्य
द्रव्यंसदृशंपशुद्रव्यमितिविधानात्पुनःसूत्रारंभः॥प्रायश्चित्तश्रुतेश्च॥प्रा
यश्चित्तश्रुतेरप्येवंज्ञायतेयत्सान्नाय्यधर्माःपशोर्भवंतीति।कथं।पशुश्चेदव

Indira Gandhi National
Centre for the Arts

वेक्षान्नाय्यो स्यावा तामभिमंत्रयेतेति प्रायश्चित्तश्रुतिः। अस्य। हि श्रुतौ पशावुख्या दृश्य
ते। स च तद्देवतः पयसो यदा पशोः सान्नाय्यधर्मी भवेति। नान्यथा। तेन्वनया श्रुत्या निष ४८
रीता बुद्धिरुदेति। यत्पशोः सान्नाय्यधर्मो न भवतीत्यवतीत्येवं विधा। कथं। यदि पशोः सा
न्नाय्यधर्मा भवेयुः तदा सान्नाय्यस्याम्याः स्वदेवता यदभिमंत्रणं तत्पयस्यो स्वा स्वदेवता
इवश्यस्याया अपि स्वदेवताप्राप्तावा। किमर्थं पुनरुच्यते स्कन्नेदिति। उक्तं चानेनो
ज्ञायते सान्नाय्यधर्माः पशोर्न भवंतीति। उच्यते। सान्नाय्यस्यादासोहि प्रधानदुत्थस्य
सान्नाय्यस्य स्कन्तिः। पशोर्वपाणाभूतायां वपायाः। अतः प्रधानदुत्थस्य वपायाः
स्कन्ने विहितं तदङ्गभूतवपास्कन्ने न प्राप्नोतीति तदर्थमुच्यते पशूख्या चेत्स्क ४८

वेदिति तेनात्र प्रायश्चित्तश्रुतौ पशावुख्यायादर्शनात् सान्नाय्यधर्मो भवंतीति सिद्धं॥
॥ पशोः सान्नाय्यधर्मा भवंतीत्युक्तं। सान्नाय्यं हि द्विविधं। दधि च पयश्च। तत्र के बाध
सामान्यात् पशोर्दध्नोधर्मप्राप्तावाह॥ ॥ पयसः कालानंतर्याद्धर्मानुग्रहेभ्यः। पशौ
पयस एव धर्मा भवंति न दध्नः। कस्मात् कालात्॥ आनंतर्यात् धर्मानुग्रहाच्च॥
कालादिति कालसामान्यात्। समानकालत्वाद्धि पशोः पयसश्च श्रूयते। तस्माद्यदा
यां घारे तो धनेकथ पयोध्वन्त इति। अत्रागर्भधाराणां पयोधाराणां चैककालमुच्यते
तथा यदा पशुर्जायते तथ पयो जायत इति। अथवा पशुः सद्यस्कालो पयश्च सद्य
दिवाक्यात्। पयोपि सद्यस्कालात् दधिवद्यहनिष्पाद्यं। तथा आनंतर्या

Indira Gandhi National
Centre for the Arts

तापक्षुरपिगोरज्ञादेर्वापशोः साक्षादुत्पद्यते पयस्तु दधि तु पयस उत्पद्यते तेनसा
५० क्षात्पशोः । अतः पशोः प्रधानतरं दधि तु पयसा व्यवहितं तेनानन्तर्यात्पशोर्दधि
विष्ठं त एव भवति । किंच धर्मीत्तु प्रकृत्यां यागादमेत्वेसति पशुपात्राणीव पाश्रपाणी
श्रूलोखानां मासादनप्रोक्षणादीनां प्राकृतानां धर्माणामनुग्रहः कृतो भवति ।
न दधिधर्मत्वे । नैष्ठ तादिकारणात्पशोः पशोर्धर्मा एव भवंति न तत्र पाश्रपाणी
श्रूलोखानामासादनप्रोक्षणं । द्यौस्त्वा पृथिवीस्थ इत्यादिना मंत्रेण पाश्रपाणी
शदानं । विरोधाद्दधिलोपात्तथि श्रपणाभावः अन्वाहार्यपचनमानेन पाशादि
वनं । न पाश्रपाणीमाः स्थिता वा एव किं माथावेद्यामासादनं । श्रूलस्यापि धौरमी ५०

त्यादाने विरोधात् अधिश्रयणाभावः । अन्वाहार्यहृदयप्रतर्हनं । उखायामपि मंत्र
णादानादधिश्रयणा । अन्वाहार्योमांमामपश्लेपश्च । इत्येवमादयः पयोधर्मा भवं
ति ॥ ॥ दर्शपूर्णमासवन्मांड्यदयश्चाधित्यनेनानुमानिवचनेन प्राकृतपदार्थमा
त्रं विकृतौ भवतीत्युक्तं ॥ तेन प्रकृतौ या कालता कर्माङ्गता सा प्रविकृतौ
प्राप्तात्यआह ॥ सद्यस्कं काशकृत्स्निः काशकृत्स्निराचार्यो विकृतीनां सद्यस्कं स
द्यः कालत्वं ब्रवीति । कस्मात् । यदृष्टापशुना यजेत सोमेन यक्ष्यमाणः सपो
र्णमास्याममावास्यायां वा यजेतेति वचनात् ॥ ॥ अनुवादः पूर्वस्येति बाद
रायणः ।

Indira Gandhi National
Centre for the Arts

पौर्णमास्याममावास्यायां चाविकृतीनामनुष्ठानमुच्यते । न च प्रकृतितः प्राप्त
५२ मेव । अतः कारणाद् द्वयोरप्यनुवाद एव पूर्वस्य प्रकृतितः प्राप्तस्य कालस्य नापू
र्वविधिरिति ॥ ॥ स्थितं तावदसिद्धानि तन्मन्त्रधिकरणात् ॥ अतरा अथ चिन्त्यते ॥ ॥
स्थाना द नैर्ऋत्येषु धर्मला भो विप्रतिपत्तिः ॥ इदं श्रूयते ॥ मारुतं चरुं निर्वपेच्छ्रियै का
मः इति ॥ तथा अश्वदाहस्य तं चरुं नैवारं सप्तदशशरावं निर्वतीति । अथ इन्द्राय ५५
पशुपतये रौद्रं गावेधुकं चरुं निर्वपतीत्यादि । तत्रेदं दिघते । किं मुद्गादिषु प्राकृ
तद्रव्यस्थानापन्नेषु प्राकृतव्रीह्यादिद्रव्यधर्मा भवन्ति उत न भवन्तीति । तदर्थं चे
वेदं चिन्त्यते । किं प्राकृतो धर्माणां व्रीहिस्वरूपं प्रयोजकम् अपूर्वसाधनत्वं वा ॥ किं ५२

सं ३

चातः । यदि स्वरूपं प्रयोजकं तदा स्वरूपस्य विकृतौ मुद्गादिष्वभावान्न तद्धर्मप्राप्तिः
अपूर्वसाधनत्वस्य धर्मप्रयोजकत्वे तस्य मुद्गादिष्वपि भावात्तत्प्रयुक्तानां धर्माणा
मपि प्राप्तिर्भवतीति । तत्र व्रीहीनवहन्तीति व्रीहीन्प्रोक्षतीति व्रीहिदलयोगेन धर्मा
णां श्रवणात् मुद्गादिषु न भवन्तीति प्राप्त आह द्रव्येषु नैर्ऋतेषु मुद्गादिषु द्रव्येषु
प्राकृतद्रव्यधर्मा भवन्ति तत्र प्राकृतद्रव्यकार्यापन्नत्वात् । यतः प्राकृतो व्री
हीणामपूर्वसाधनत्वं धर्माणां प्रयोजकं न व्रीहिस्वरूपं । व्रीहिस्वरूपस्य प्र
३ योजकत्वे धर्माणामानर्थक्यापत्तेः । विना हि संस्कारान्व्रीहित्वस्य सिद्धत्वात् ।
अतो व्रीहीन्प्रोक्षतीत्यादावपूर्वसाधनं प्रोक्षतीत्यर्थः । अपूर्वसाधनत्वं च

Indira Gandhi National Centre for the Arts

वैकृतेष्वपि मुद्गादिषु सतीति भवत्येव प्राकृतद्रव्यधर्मलाभः। कीदृशाः। अविप्रति
षिद्धाः। यः प्राकृतद्रव्यधर्मो वैकृतद्रव्ये धर्मगानविद्धतिषिध्यते। यस्तु विप्रतिषि
५२ ध्यते स न भवति। यथा परिवापस्तु निष्प्रोजनात्। त्र्यग्रूपरिवर्गूपकार्यापन्नस्याप्य
पधर्मप्राप्तोऽप्यवहननं न भवति। परिवापेन तन्निष्पादितत्वात्। एवं वैकृतद्रव्ये प्राकृ
तद्रव्यकार्यापन्ने प्राकृतद्रव्यधर्माः सर्वे भवन्तीत्युक्तं॥ तेन प्राकृतद्रव्यसंबंधि
मन्त्रेऽर्पितस्याभिधाने प्राप्ते। तत्र संदेहः। किमूहितेनाभिधानोऽथानूहितेन
यथाश्रुतेनेति। विशेषानुपदेशात् यथाश्रुतेनानूहितेनाभिधाने प्राप्ते आह॥
यथार्थमूहस्यादिति विहितवैकृतद्रव्ययथार्थमूहो विपरिणामः कर्त्तव्यः। या ५२

यो वैकृतार्थो यथार्थो यस्याभिव्यक्तौ यः प्राकृतद्रव्यस्थानापन्नो वैकृतोऽर्थः। तस्यां
तद्धाविपदप्रयोगः कार्यः। यथा प्रकृतावग्नीषोमाभ्यां छागस्य वपायै मेदस
इति छागस्य यागसाधनभूतस्याभिधाने कृते। विकृतौ च सारस्वतामेष एड
ऋषभ इत्यादौ मेषर्षभयोर्यागसाधनत्वेन विधानात् छागस्य तत्स्थानीम ग
षस्यर्षभस्येति वैकृतस्यार्थस्याभिधानं कर्त्तव्यं। एवं अग्नीषोमाभ्यामित्यस्य
पदस्य स्थानेऽपि सरस्वत्यै इन्द्रायेति वैकृतस्यार्थस्याभिधानं कर्त्तव्यं एवं प्रकृ
तौ छागस्यैकत्वात् छागस्यैकवचनं। विकृतौ तु छागद्वित्वानेकत्वे छाग
योश्छागानामित्यूहः। वपानेकत्वे वपाभ्यां वपाभ्य इत्येवमपि यथार्थमूहः।

Indira Gandhi National
Centre for the Arts

कार्ये:॥ यतः प्रकृतौ मंत्रेण प्राकृतद्रव्यदेवतादेरभिधानं कृतं। विकृतावपि प्रकृ
५३ तावद्विप्रकृतिवद्भावात्तेन वैकृतद्रव्यदेवतादेरभिधानं कर्त्तव्यं। अनूहितश्च
तत्कर्त्तुं न शक्नोत्यतोर्थाद्यूहते। वेदितइति विशेषोपादानान्मुख्यमाहश्येन
गृहीतेप्रतिनिधिभूतमेषादौ चूहो न भवति। तथा चोक्तं श्लोके अविप्रलिप्तिरिति
एवं सर्वत्रोहप्राप्तौ क्वचिदपवादमाह॥ ॥नप्रकृतावपूर्वत्वात्। प्रकृतौ पत्नी
वा ऽसंनह्य पत्नीं च विसृज स्वपत्नी वाचं यच्छनेष्टः पत्नीमुदानयेत्येवं वदनं एकपत्नी
कप्रयोगेऽपि पत्नीत्यर्थं॥ अनेकपत्नीकप्रयोगे ऊहितव्यं न वेति संदेहे निर्णीय
ते। प्रकृतावूहो न भवति। कस्मात्। अपूर्वत्वात्प्रकृतेः। यतः प्रकृतेरन्याप्र ५३

कृतिर्नास्ति। यद्धि क्रियते। अतोऽनेकपत्नीकेऽपि पत्नीमित्येकवचनांतमेव प्र
युज्यते नोहितं। एवं पवित्रे स्थइत्यत्र दपि पवित्रत्रयपक्षे नोहितव्यं। प्रकृतिव
द्विकृतिः कर्त्तव्येत्यनेन प्रकृतितः सर्वे धर्मा विकृतौ प्राप्नुवंति। तत्र केषां चिद्ध
र्माणां बाधमाह॥ ॥विकृतौ वचनार्थलोपाविरोधेभ्योऽप्रवृत्तिः। विकृतौ प्राकृ
तधर्माणां वचनादप्रवृत्तिर्भवति। यथा पितृयज्ञेन प्रस्तरं गृह्णातीति नांतर्धा
तिधृती। अथ वा आघ्नन्दो नार्षेयं प्रवृणीते। नाप्सुः प्रस्तरमुल्लुंपतीति। यथा गृ
मेधीयेनस्याशित्रमिति। तथा अर्थलोपादपि विकृतधर्माणामप्रवृत्तिर्भवति।
यथा मुञ्जेषु कण्डनस्य। यथा चरोः प्रथनाद्दिरभिमर्शनसंयवनादेः। यथा सान्ना

Indira Gandhi National Centre for the Arts

यच्छेषो कृष्णाजिनोलूखलमुसलासादनादेः। तथा विरोधादपि प्राकृतधर्माणां वि
५४ कृतावप्रवृत्तिर्भवति। तद्यथा। वरोपयाम मभिवासनेन। परिधौ पशुनियोजनमि
त्यत्र यूपस्थानापन्नस्य परिधेः स्फ्याग्रोचादयुपसर्जनीनामप्रविश्यन्ते च॥ ॥प
रार्थो [illegible] यत्तेस्तदभावे भावः। परार्थ
मध्यार्थमुत्पन्नियच्छामो परार्थोत्पत्तिः तस्य परार्थोत्पत्तेस्तदभावे तस्य परस्या
भावे तस्य परार्थोत्पत्तेः तस्या भावो भवति। यथा प्रकृतौ तंडुलनिष्पत्तिनिमित्ताकण
नात्पत्तिः परार्था। तंडुलार्थो। अतः परार्थोत्पत्तेः कणादेः तस्य परस्य तंडुला
देरभावे पयस्यादेः तस्याधिकरणादेरभावो भवति तदभावाद्यत्तदर्थस्यापा ५४

सनस्याप्यभावः। यथा च विंछ्यां पात्र्यंगुलिप्रक्षालनस्य तदर्थनिनयनस्य चाए
वं सर्वत्रप्राप्तौ कृविद्विशेषमाह॥ ॥चोदितत्वाद्वाभावः। यत्र परार्थोत्पत्तेर्द
र्यक्वचित्कांमेतरसाधनत्वेन चोदितं भवति। तत्र परस्याभावेपि परार्थोत्प
त्तस्य द्रव्यस्याभावो भवति। तद्यथा यूपशकलेन स्रुक्संमार्ष्टीति यूपतक्ष्णमा
त्रोत्पन्नं शकलं तस्य ग्रहसंमार्गमात्रेण तत्वेन विहितत्वाद्यूपाभावेपि शकल
मात्रं गृह्यते संमार्गसिद्ध्यर्थं॥ यतोत्र शकलादिद्रव्यं क्रियार्थं। तेन क्रियाप्र
धानभूतातदंगस्य भूतं शकलमात्रं स्वसिद्ध्यर्थमाक्षिपति। यत्र तु क्रियाद्रव्या
र्था॥ तत्रेद्रव्यप्रधानभूतस्याभावे गुणभूताया क्रियायाश्चाभाव एव युज्यते॥

Indira Gandhi National
Centre for the Arts

स्थितादुत्तरमुच्यते। तत्रैवं पूर्वपक्षः कृतोस्ति। पौर्णमास्यां पौर्णमास्या यजेतामावा
५५ स्यायाममावास्यया यजेतेत्यादिना प्रकृतिविहितस्य प्रतिपन्नज्ञानस्य यागका
लस्य विकृतावपि प्राप्तत्वाद्य इष्ट्येतिवाक्यममावास्यायां पौर्णमास्यामित्यनुवा
द एव नापूर्वकालविधिरिति। तत्र सिद्धांतमाह॥ ॥न विपक्षे क्रियास्कः समभि
व्याहारात विपक्षशब्देन प्रतिपदुच्यते। विपक्षे प्रतिपदि वैकृत्यः क्रियानस्कः किं
तर्हि पौर्णमास्याममावास्यामेव स्कः कस्मात। समभिव्याहारात। समभिव्याहा रा २
रो वाक्यं। तस्मात॥ य इष्ट्येत्यादिवाक्यात। ननु प्राकृतस्यैव कालस्यायमनुवा ५५
द इत्युक्तं। नानुवादः। अनुवादे हि वाक्यस्यानर्थक्यमेव स्यात्प्रत्र त्रिविशेषक

त्वाभावात॥ पौर्णमास्यमावास्याशब्दयोर्लक्षणया प्रसंगाद्या। अनुवादे हि पौ
र्णमास्यमावास्याशब्देन गौणप्रसंगात्वात्प्रतिपल्लक्ष्यते। तथा च श्रुतार्थपरित्यागो
भवति। न चैतदुपपन्नं। प्रलक्षणानुरोधेन श्रुतिबाध्याता। किंच। सोमस्यैव दर्श
वकालविधानं। न हि वाक्यांतरेण तस्य कालो विहितोस्ति। यस्मादयमनुवादः
स्यादुच्यते। अतोविनानुवादः। य इष्ट्येत्यत्र वाक्ये इष्टिग्रहणं नैवायग्रहणं
सिद्धेऽनिष्टिरूपस्याप्यायनस्य पौर्णमास्यमावास्यालक्षणकालविधा
नाय पृथग्ग्रहणं ग्रहणं॥ तेन दर्शपूर्णमासानीजानो दक्षिणामिपक्व
वानुष्ठानेप्रवासः। भोजयेदित्यादावनिष्टिरूपेप्यायायणे पं कालः सि

Indira Gandhi National
Centre for the Arts

द्धो भवति॥ ॥अथ दाक्षायणयज्ञमुपनिबध्नाति॥ ॥दाक्षायणयज्ञः प्रजापशु
५६ न्नयशस्कामस्य॥ दाक्षायण इति वक्ष्यमाणस्य कर्मणो नामधेयं॥ तस्माद्दाक्षा
यणयज्ञानामतिरिक्तेः। स च प्रजाकामस्य पशुकामस्यान्नकामस्य यशस्कामस्य
च यजमानस्य भवति। अत्र पर्यायेणैकैकफलसिद्धिः। अथ य मन्पूर्वं करन्नीषाम्नी
येण यजते पौर्णमास्याम् इत्यादिवाक्येषु सदेवतानि दार्शपौर्णमासिकान्येव
हवींषि प्रत्यभिज्ञायंते। केवलं त्वग्नीषोमीयैन्द्राग्नसान्नाय्यानीति क्रमभे
देन विकारः। तथा च संदेहः। किं दार्शपौर्णमासिका एवैते यागा गुणमात्र
विकृता उत तद्यागेतरा गुणतो नितुल्यद्रव्यदेवताकानि विधीयंत इति। तत्र ५६

सूत्रेणैव पूर्वपक्षयति॥ ॥नामफलगुणयोगात्कर्मांतरं। अयं दाक्षायणयज्ञो
दर्शपूर्णमासतो भिन्नं कर्मांतरं। न दर्शपूर्णमासौ। कुतः। नामफलगुणयोगा
त्। नामान्यत्वात्॥ यतो दाक्षायणयज्ञ इति भिन्नं नाम। तद्वदाव भेदो दृष्टो य
थाचैत्रादन्यो मैत्र इति। तथा फलभेदात्॥ दाक्षायणस्य हि प्रजादि फलं श्रू
यते। फलान्यत्वे च फलिनोन्यत्वं भवति। गुणान्यत्वाच्च। गुणान्यत्वं च दृश्यते
मैत्रावरुण्यामिक्षा अग्नये वाजिभ्यो वाजिनं जुहोतीत्यादि। अतः कर्मांतरमिद
प्राप्ते आह॥ ॥गुणाद्विधानं वा संनिधिं तु ह्रद्वचनाभ्यां। बाधाच्च। मन्त्रव्या
हृत्तौ। न दर्शपूर्णमासतोन्यत्कर्मांतरं। किं तर्हि गुणविकृतो दर्शपूर्णमा
ने

सावेवैतावितिा कस्मात् । सं निबंधः दर्शपूर्णमाससंज्ञिकावेव दाक्षायणस्यया
गतः । आजिवा एतद्यावेतिये दर्शपूर्णमासाभ्यां यजेत इति दर्शमासो प्रकृत्यन
५७ स्माद्द्वत्रिंशतमेव वर्षाणि यजेतेत्यभिप्रायाद्धयपक्षे दाक्षायणयज्ञस्यादथो
अपि पंचदशैव वर्षाणि यजेतेति दर्शपूर्णमाससंज्ञितोपस्थमानत्वात् तद्धु
हिक्रियते । तथा संपद्वचनाद्य । अत्रह्येको मासः संपद्यते द्वे हि पौर्णमास्यौ
प्रज्ञाते द्वे अमावास्ये अत्रो एव खलु मासं संपद्यवतीति दर्शपूर्णमासयागप
क्षे हि एकैकः । पौर्णमासामावास्यायागः । अत्र तु द्वौ द्वौ पौर्णमासामावा
स्यागौ ॥ तेन त्रिंशद्वर्षसंपत्त्यैव दर्शमिरवव र्षसिद्ध्यतीति वदंतीश्रुतिर्हि ५७

क्षायणयज्ञस्य दर्शपूर्णमासरूपतां गमयति । यदुक्तं नामांतरत्वात्कर्मांतर
त्वमिति । तद्गुणांतरयोगादेकस्यापि नामांतरत्वं भवति यथा क्षत्रियो यजे
ति यथा क्षत्रियो तथा च । ब्रह्मचारी गृहस्थो वनी परिव्राजक इति धर्मभेदात्तदे
कस्यैव नामांतरं । तथा अत्रापि यस्मादिगुणांतरयोगान्नामांतरत्वेन कर्मां
तरसाधकं । यथा वदः कलशाः कुंभ इति । यद्युक्तं फलभेदात्कर्मान्यत्वमिति ।
मतं । तच्चु कलं गुणात् ॥ कुतो द्वे । यद्यपि फलवाक्ये गुणांतरयुक्तावेवयागाः
संनिहिताः तथापि यागानां पौर्णमास फलवाक्ये नैव क्रतु प्रयोजनत्वाद्गुणाः
नीतार्कस्मार्थीत्वाद्गुणाएव फलसाधनत्वेनाविधीयते न तु यागाः । अतो द

Indira Gandhi National
Centre for the Arts

ध्नेंद्रियकामस्य जुहुयादित्यादिवद्गुणान्यत्वेन कर्मणो भिन्नत्वमापादयति।
५० यद्यप्येकगुणान्यत्वाद्गुणिनोऽन्यत्वं भवतीति तदपि अनैकांतिकं। यथा दाक्षा
ग्निहोत्रएव दधिलक्षणगुणान्यत्वेपि न कर्मांतरता। यथा वा लोके आम्रफ
लादेः। तथात्रापीति। तस्माद्गुणमात्रविकृतो दर्शपूर्णमासयागावेवेति वि
तिसिद्धं॥ किंतावत्प्रयोजनं। दोषापगमयज्ञानुष्ठाने पक्षे दर्शपूर्णमासयोर
नुष्ठानं। अंगमाद्यवा अस्य दर्शपूर्णमासाभ्यामिष्टं भवतीति स्तुतिरयसुम
वार्थप्रकाशयति। अथ दर्शपूर्णमासतः कालक्रमभेदनद्वयीष्युपदिशति॥
अग्नीषोमीयः पौर्णमास्यां तु ख्यायां पौर्णमास्यामुद्धरणादिकर्मप ५०

पवर्गितोग्नीषोमीय एकादशकपालः पुरोडाशो भवति। अथ यत्पूर्वस्मादग्नीषो
मीयेणायजते पौर्णमास्यामिति केवलस्यास्य विधानादाग्नेयोपांशुयाजयोर्नि
वृत्तिः॥ ॥ ऐंद्राग्नो मावास्यायां मुख्यायाममावास्यायां उद्धरणादिकर्म
पवर्गित एव ऐंद्राग्नो द्वादशकपालः पुरोडाशो भवति। अथ यत्पूर्वस्मादैंद्राग्ने
नयजतेमावास्यायामिति अत्रापि एकस्यास्य विधानादाग्नेयोपांशुयाज
योर्निवृत्तिः। यदेव पौर्णमास्यां यजते द्व अमावास्य इति द्वयोर्मुख्यानुख्यमा
योगं विधायायत्पूर्वद्युरिति विधानादत्रापौर्णमास्यमावास्याशब्दो मुख्या
यो॥ सान्नाय्य नत्सातः अमावास्यां दानयस्या मे त्रादक्षणीति अमावा

Indira Gandhi National
Centre for the Arts

स्यायां विशेषस्य वक्ष्यमाणत्वात् पौर्णमास्यामेवानेन सूत्रेण विशेष उच्यत इति
५९ ज्ञायते । तेन प्रातः पौर्णमासीप्रतिपदि सान्नाय्यं चेत्कर्म भवति । यथा तेनाग्ने
यः पुरोडाशः दधिपयसी वहविषी इन्द्रस्य देवता एवमिहापि भवतीत्यर्थः । अथ
प्रातराग्नेयः पुरोडाशो भवत्यैन्द्रं सान्नाय्यमिति श्रुतेः । ऐन्द्रं सान्नाय्यमित्युक्तत्वा
त्याक्षिकस्य माहेन्द्रस्य निवृत्तिः । अत्राग्नेयः स्वस्थाने स्थित एवानपीत्सु सान्नस्था
नेन्द्रं सान्नाय्यं मा मावास्यायामपकृष्य विहितं । अग्नीषोमीयपुरोडाशस्तु
पूर्वं प्रकृष्य पकृष्ट इत्येषोत्र गुणविकारः । ऐन्द्रं सान्नाय्यमित्यत्र दध्येवा केवलं भ
वति न पय इति केचित् ॥ ५९ ॥ अमावास्यायामेव मैत्रावरुणी भविष्यति ॥ ५९

ते । तथा च शाखान्तरे ऐन्द्रं दध्यमावास्यायामिति श्रूयते । इतरथा त्वपूर्वं एव मैत्रावरु
णीयागः स्यान्न दार्शपौर्णमासिकस्य गुणविकारस्तस्मात् पौर्णमास्यां दध्येव
कं भवति न पय इत्याहुः । एकवचनमुपयुज्यते । इतरथा दधिपयसी हि त्वाद्द्वि
वचनं स्यादिति । सान्नाय्यशब्दश्च सन्नीयते गोभिरिति सान्नाय्यमिति यौगिकत्वा
त्स्त्यैकाभवद्वर्त्तत इति । न त्वेतद्युक्तमिव । शतपथे अग्नीषोमीय एव पौर्णमासं
हविः सान्नाय्यमावास्यैन्द्रं वा सान्नाय्यं गच्छ ५ सान्नाय्यमित्यादौ समस्तपारव
दधिपयसोरेकवचनं तस्य सान्नाय्यशब्दस्य दर्शनात् । विनोत्पवमदन्नेवनु
मदिष्यत इत्यस्य च दोषस्यापरिहारस्य संगावात् तथा च दर्शयति सान्नाय्यमा

Indira Gandhi National
Centre for the Arts

छमेवाह। तत्र च यदि पयः सांनाय्यदेवमात्राख्यं। अतो यागांतरमेवैतत्पयस्यामाव
नके वचनात् अमावास्यायां क्रियते। दधिपयसी तु उभे अपि वचनात्पौर्णमास्यामस्या
५ ६० तामिति। नन्वग्नीषोमीयः। पौर्णमास्यामैंद्राग्नामावास्यायामित्युक्त्वा सांनाय्यमन्या
तरित्युभयत्र प्रातः सांनाय्यविधानेऽकृत्स्नं न भवति॥ उच्यते। अमावास्यामुपादाय
प्रातः पयस्याविधानात्। न च नु तत्र सांनाय्यमपि भवतु विधानसामर्थ्यात्पयस्या
दीत्येतन्न। अथ प्रातराग्नेयः पुरोडाशो भवति मैत्रावरुणी पयस्या नेन्द्राद
धानीत्याग्नेयः पुरोडाशोऽथ तावद्वा मैत्रावरुणा इद्देवतं ऽशक्त्यात् हविर्द्व
यस्यैव विधानात्॥ आग्नेयमुक्त्वाथ तावद्वा मैत्रावरुण्या विप्ले वकारोऽथशब्दो ६०

न्याम न्यस्य हविरंतरस्याभावप्रतिपादनात्। तस्मात्पौर्णमासी प्रतिपदिष्ट्या
ग्नेयः पुरोडाशो दधिपयसी चेति त्रीणि हवींषि ।अमावास्यायां चाग्नेयः प्र
त्रावरुणी पयस्येति द्वे एव हविषी। उपांशुयाजस्त्वत्रापि न भवति विधाना
भावादिति॥ अत्र मुख्यायां पौर्णमास्यामुद्धरणादिकर्मापवर्गात् मग्नीषो
मीयं मध्य एव प्रातः परिसमाप्य पुनरुद्धृत्याग्न्याधानं त्यागं शाखाछे
दद्व्यथैवत्स्यापाकरणापवेषकरणपवित्रवं वनानि यथाकालं कृत्वा
सायं दोहमानंतरं दोहमातन्व्यनिधानांतं कृत्वा प्रातर्दोहार्थं वत्सापाकर
णशाखारुहनं न कुर्वति॥ ॥अमावास्यायां पयस्या मैत्रावरुणी प्रातरि

Indira Gandhi National
Centre for the Arts

६१

त्यनुवर्त्तते॥ अमावास्यायां प्रातः प्रतिपादि मैत्रावरुणी पयस्या भवति। अथ प्रात
र्गोनः पुरोडाशो भवति मैत्रावरुणीपयस्येति श्रुतः। अत्राग्नेयः स्व स्थाने स्थित एव।
पयस्या त्वपूर्वोक्त पाशुपान स्थाने विधीयते। ऐन्द्राग्नश्च पूर्वेषु स्वरूपेइति गुणविका
रात्र। अत्र मुख्यामावास्यायां प्रातःकाले मध्य एवाहरणा। दिकमीपवर्गेन मैन्द्राग्न
यागं कृत्वा तदानीमेव पुनरुहृत्याग्न्यावाधान पिंडपितृयज्ञप्रत्याशनशाखाच्छे
दनसंनमनो एवषकरणपवित्रच्चंधनानि यथाकालं कृत्वा सायं होमानेतरं मै
त्रावरुणीपयस्यार्थं वत्सापाकरणं कुर्यात् ॥ तत्र मित्रावरुणाभ्यां प्राप्रमि ६१
तिमोरूपस्पर्शने विशेषः। शाखोच्छेदनं च ॥ प्रा तद्विशेषमाह॥ तत्रैव दोहनं च

तेवा दध्यानयतिति तत्रैव तस्मिन् लौकिके दधन्येव वान्यनि वापानंतरं पयस्यार्थं दोह
नं कृत्वैव। प्रथमं दृष्ट्वा यालौकिकघनीभूतं दध्याति तत्र न्यर्थः। अथवा पयस्येति श्रुत
तन्त्रे सति पश्चाद्दूषमानयति निनयति नप्रथम॥ केचिदेवं व्याचक्षते॥ अमावास्या
यां पयस्या मैत्रावरुणी तत्रैव दोहनं। प्रातरिति अनुवर्त्तते। अमावास्यायां प्रात
प्रतिपदि मैत्रावरुणी पयस्या भवति। सांनाय्यवत्सापाकरणे इति सायं दोहप्रातर्दो
हे च प्राप्ते सायं दोहनिवृत्त्यर्थमाह तत्रैवादोहनं॥ तत्रैवेति प्रातस्तनमानमि
ति॥ तथा सृतेवा दध्यानयतीतिवाशाद्वृदश्रतेवा पयसि लौकिकं दध्यानय
तीति। एतदपि समीचीनं व्याख्यातं॥ अपरे त्वेवं व्याचक्षते। सांनाय्यवत्सापाकरणे इ

Indira Gandhi National Centre for the Arts

तुभयत्रदधिपयसीस्त एव।तत्रैवदोहनमिति।पयस्याः।पयोधिकरत्वान्निरु।
थ्याऽस्यप्रातर्दोहनमन्यस्मिन्नित्यनेनसायंदोहपात्रादन्यस्मिन्पात्रे दोहनं।प्राप्त
६२ ति।नद्याऽपवादोयं।तत्रैवति।तत्रैवसायंदोहदध्याद्यवप्रातर्दोहनकार्यंभ्य
वाश्ये प्रातर्दोहे सायंदोहदधिनिनयति।।एवंदधिपयोर्भ्यां एषपयस्यानिष्पाद्य
तइतिपूर्वग्रंथेऽप्यपिमित्रावरु।।।भ्यामेवार्थनिष्पादनीयमस्मिन्पक्षे।शाखा
तरेचपयस्योत्पत्तावन्यैवप्रकारस्यदर्शनादिदमपिननिर्मूलं।तथावादापस्तंबः
तप्तेप्रातर्दोहे सायंदोहमानयती।तथाचमानवे।तप्तेप्रातर्दोहेसायंदोहमा
नीयामिक्षांकरोतीति।सर्वत्रपयस्यानिष्पादनस्यायमेवप्रकारः।।तथाचनसं ६२

प्रदायो वस्थितइति।स्वशक्त्यैतोपयस्यानिष्पादनप्रकारस्यानुपदेशाः रुखा
खांतरस्कृतितोनिर्णयः।। ।।वाजिनंनिषिच्योत्करेकरोति।तप्तेपयसिदधि
निनयनेकृतेदधिपयसोःसारभूतयत्।कठिनंसंपद्यतेसापयस्या।यद्वदं
कपृथग्भवति।।तद्वाजिनमित्युच्यते।पयस्योद्वासनकाले।तद्वाजिनंनिषि
पात्रांतरस्थमुत्करेकरोति।सर्वेहविषामासादनानंतरमुत्करेआसादयती
त्यर्थः।।उत्करेवाजिनसादयतीतिशाखांतरेश्रवणात्।सूत्रकारस्तुआसाद
यतीत्यस्यस्थानेप्रापणंकरोतेःप्रयोगंकरोतियथातदंतर्वेद्यासादयतीति
श्रुतेर्वेद्यांकरोत्यपरंप्रोक्षणीभ्यइति।प्रियणंकरोत्याग्नेतिहवींषिवेद्यांक

Indira Gandhi National
Centre for the Arts

त्वे तिच॥ ॥अनाज्यलिप्तं वा॥ ॥तत्रस्याभिघारस्यापेविकल्पः॥ यस्याया
६३ मन्नाभिघारे अकृते वा वाजिनं निषिञ्चेत्॥ यदा वा कृते तदा वा कृते तदा अना
ज्यलिप्तं निषिक्तं भवति॥ तथा वशाखांतरे अनाज्यलिप्तं निषिञ्चेति। तदा च
वाजिननिषेकानंतरं यस्य वाजिनयोः पृथक्तन्त्राभिघारणं। प्राणादा
नं चोभयपक्षेपि। अथवा अनाज्यलिप्तं वा। वाजिने आज्यलेपोन कोपिः। अ
स्मिन्पक्षे वाजिनस्यतन्त्रा। भिघारस्याभिघारप्राणादानेपि स्याद भिघारणे
नाम भावः॥ वाजिनयागस्य कालमाह॥ ॥प्रहृत्यन्दृणं तेन चरति। हुते
तेन चरति। तृणं प्रहृत्य प्रस्तरहोमानंतरं प्रस्तरमध्यमध्ये हीतत्वात् तस्यानुप्रह ६३

रणं कृत्वा त्मनमालभ्यापः स्पृष्ट्वा वाजिनेन चरति। वाजिनेन यागमनुतिष्ठति
यद्यपि प्रहृत्यन्दृणमिति तृणं प्रहरणानंतरमात्मालभस्याविधानात्स्यादकृते
च विकृतावित्यनेन न्यायेन पूर्वमात्मालभोदकोपस्पर्शने कृत्वे वाजिनया
गः कर्त्तव्यः। वाजिनयागस्य कालांतरमाह॥ ॥विमुच्य वा स्रुचावथवाऽस्रु
चौ विमुच्य ता...वीतिमंत्रेण स्रुचोर्धुरि स्योर्वा निधानानंतरं वाजिनेन चर
ति। तिगतेन सं वंधः। सवेपश्चादिवयज्ञस्यजुहोतीति श्रुतेः॥ ॥बर्हिरव सि
चन्त्य् क्लाति॥ इन्त्वा स्रुवेणाग्रहणो प्रास्तं बर्हिरवसिञ्चन्त्युपदेशादवघती
त्यश्व वा णाच्च स्थालीमुखेने वज्जुह्वा निनयति बर्हिषि स्कन्दं कुर्वेन्॥ न हि स्क

Indira Gandhi National
Centre for the Arts

वेणासकृद्ग्रहणे क्रियमाणे बर्हिषि सेचनं वाजिनयागे दिग्व्याघारणे भक्ष
णे पर्यायेण वाजिनं न भवति। अतः स्थालीमुखेनैकस्कन्दिनिनयनं कार्यं। अत्र वा ६४
जिनस्याज्यलेपनिषेधपक्षेनोपस्तरणाभिघारणे। शृताभिघारमात्रनिषेधपक्षे
तु भवत एव। कस्मादेवमन्यत्राप्यहविषः स्कन्दनमुच्यत इत्यत आह॥ ॥ तदृष
भेषु रेतो दधातीति श्रुतेः। शाखांतरे एवं श्रूयते यद्बर्हिषि वाजिनं जुहोति तदृ
षभेषु रेतो दधातीति॥ ततश्च निबलादेवमन्यत्रापि युक्तमे वनोषि
वचनस्यातिभार इति॥ ॥ वाजिभ्यो नुवाचयति॥ ग्रहणानंतरं वाजिभ्यो नु
ह्रीत्यनुवाचयति। होतारं। तदनंतरमेवापदेशात। तत्पूर्वं॥ ॥ प्रतिवषट्कारं ६४

९

कृत्वा वाजिनशेषेण दिशो व्याघारयति। दिश इति प्रतिमंत्रं प्रदक्षिणं पुरस्ता
त्प्रथमं॥ होतुर्हि अत्र द्वौ वषट्कारौ स्तः। वषट्कारो नुवषट्कारश्च। तत्र प्रतिवषट्का
रं द्वयोरपि वषट्कारयोः कृत्वा यजति स्थाने जुहोति स्थाने भागस्य कृत्स्ने
न वाजिनशेषेण दिशः प्रदिश इत्यादिभिर्मंत्रैः प्रतिमंत्रं प्रति दिशं सर्वासु दि
क्षु आहवनीयस्याग्नेः प्रदक्षिणं दिशो व्याघारयति। दिशः कर्मभूता अभी
लक्षीकृत्य वाजिनशेषं क्षारयति अग्नेस्तत्र हि कृत्स्नदेशेनुहोतीत्यर्थः। तत्रापि
प्रथमं पुरस्तात्प्राच्यां दिशि व्याघारयति। अत्र दक्षिणग्रहणं पुरस्ताद्ग्रहणं
च श्रौतं। अतस्तदन्यथाभावे श्रौतं प्रायश्चित्तं। एवं चतुर्भिर्मंत्रैर्घृतस्य सु दि

Indira Gandhi National
Centre for the Arts

स्रुव्याघारोस्तीत्याह ॥ ॥ ऽन्तमाभ्यामध्ये श्वर्वार्हे च । दिश इत्यादीनां मंत्राणाम
मध्येऽन्तमाभ्यामपच्छेद्याभ्यां ऽ हि दिशः दिग्भ्य इत्याभ्यां मंत्राभ्यां यथाक्रमं अभि
६५ मध्ये अग्नेः । पूर्वार्हे पूर्वभागे व्याघारयति ॥ वषट्कारानुवषट्कारयोर्होमस्तु
आहवनीयस्य पूर्वभाग एव कार्यः ॥ सर्वे प्रागेवाग्नेर्जुहोत्यग्नेर्वीहीनुवषट्कारो
ति तत्स्विष्टकृद्धोमेन ऽ सर्वे प्रागेव जुहोतीति श्रुतेः ॥ अत्र विशेषमाह ॥ ॥
स्वाहाकारः सर्वत्र साकांक्षत्वात् ॥ सर्वत्र दिशः प्रतिदिशः ऽऽ इत्यादि मंत्रेषु
स्वाहाकारोनुषंजनीयः ॥ दिग्भ्यः स्वाहेत्यत्रैव पठितत्वादत्रैव प्राप्नोति नान्य
त्रेत्यत उच्यते सर्वत्रेति । कस्मात् साकांक्षत्वाद्दिश इत्यादीनां मंत्राणां । सा ६५

कांक्षा हि ते क्रियापदाभावात् अतः स्वाहाकारोनुषज्यते निराकांक्षीकरणा
य । ननु तर्हि स्वाहाकारयोगादिग्भ्य इत्यादौ चतुर्थ्या भवितव्यं ॥ नैव । मंत्रत्वा ।
मंत्रा ह्येते मंत्राश्च यथाश्रुता एव प्रयुज्यंते । सुपां सुपो भवंतीति प्रथमैव तत्र च
तुर्थ्यर्थे भविष्यतीति ॥ शेषमुपहूयस्वेत्यामंत्र्यामंत्र्य भक्षाणामुपहूतेऽनिप्रसृतः । २
शेषं स्रुक्स्थितं हस्ते भक्षणार्थं गृहीत्वा मुकोपहूयस्व । भक्षणार्थमनुज्ञानी
हीत्येवं होत्रादीन् सर्वानामंत्र्यामंत्र्य एष्टाष्ट्र ऽपहूत इति तेन तेन प्र
त्यनुज्ञातः सन् तस्य शेषस्य भक्षणं करोति । शेषमित्यस्याहे तीयां तस्य भक्ष
णमित्यनेनान्वयाद्भक्षणार्थं हस्ते गृहीत्वेत्यध्याहृत्य योज्यं । यावदारिके

Indira Gandhi National
Centre for the Arts

यैन्न दत्तऽस्यादेभिः॥ तेन ह्वानरूपह्वयस्याभ्यर्यउपह्वयस्वेत्येवमामंत्रणाकार्यं॥ ॥
६६ ॥प्रसंगात्सोमभक्षणे पीमं विधिमुपदिशति॥ ॥सोमेच। सोमे पित्र्यभिषोमादौ
ग्रहचमसादिस्थस्याहृतशेषस्य सोमस्यैवमेव ह्वानरूपह्वयस्वेति भागिनस्त्राम
न्त्र्यं चोपहूत इति तैरनुज्ञातो भक्षणं कुर्वीत। नानुपहूतः सोमः पातव्य इति
वचनात्॥ ॥अविशेषहोमाभिववचषट्कारसमाख्यादिनिमित्तेनानेकसा
धारणेषु सोमेष्व साधारणेषु च सोपहवं भक्षणमाह॥ ॥साधारणेषु
वा सामर्थ्यात्॥ वा च साधारणे। साधारणेष्वनेकसोमेषु सोपहवं भक्षणं। नासाधा
रणेषु नाराशंसचमसादिस्थेषु हुतः। सामर्थ्यात्। साधारणेष्वेव सोमेषु ६६

नुज्ञाप्रार्थनं समर्थं युक्तं भवति। अधिकपाने दोषाशंकायां हि भागिभ्यः अनु
ज्ञा प्रार्थ्यते। अनुज्ञातस्याधिकपानेपि दोषो न भवतीति। अतो होमाभिषव
वषट्कारसमाख्यादिनिमित्तेनानेकसाधारणेष्वेव हुतशेषसोमेषु सोपह
वं भक्षणं भवति। नासाधारणेषु। अथ वाजिनशेषभक्षणे मंत्रानाह॥
स्तनूना त्वा वाजिनी वाजिनं भक्षयामीति॥ अनेन मंत्रेण वाजिनशेषभक्ष
णं सर्वे कुर्वन्ति॥ ॥वाज्यहं वाजिनस्योपहूतस्योपहूतो भक्षयामीति वा।
अनेन वा भक्षणं कुर्वन्ति॥ ॥वाजेवाजी भूयासमिति वा॥ अनेन वा वाजि
नशेषं भक्षयेति। अथ भक्षपाकमभक्ष्य पितृहेथ्याह॥ ॥होत्रध्वर्युब्रह्मामीध्र

Indira Gandhi National Centre for the Arts

जमानाः।वाजिनशेषमनेनैवक्रमेणोपहवपूर्वकं भक्षयंतीतिशेषः।तद्वैवं
६७ दभक्षयंति होतावाध्वर्युश्च ब्रह्मा चाग्नीध्रश्च यजमान इति क्रितेः॥ ॥प्रथमो वा
भयतस्तु यजमानः।अथवा यजमानः प्रथमो वाजिनशेषं भक्षयति।ततो होता
नतोध्वर्युः।ततो ब्रह्मा॥ततोग्नीदिति।अस्मिन्पक्षेऽभयतक्षयेजमानः।न्तुपुनः
अस्मिन्पक्षेऽभयतः प्रथमऽत्तमश्च यजमानो भक्षयति।प्रथमो यजमानो भ
क्षयति अयुत्तम इति वचनात्॥ ततोग्नीध्रान्तं तत्पुनर्यजमानो भक्षयति।त
तस्योपहवप्रार्थने प्रथमं पश्चाच्च यजमानः सर्वैः प्र ष्टव्यः।यजमानोपह्वय ६७
स्व।होतरुप।अध्वर्यवुप।ब्रह्मन्नुप।अग्नीदुप।यजमानो ह्वयस्वेत्येवंउपह

वप्रार्थनं वद्धव्यं भक्षणाणि पदस्तोर्गृहीत्वा कर्तव्यं॥ततो भक्षणं।एवं क्रमेण सर्वैर्भ
क्षणं कर्तव्यं।ननु सद्युक्रमेण॥ ॥दाक्षायणं वा दाक्षेणा।दाक्षायणं स्तुव॥॥
मुच्यते।तेनात्रहि रणपदक्षिणात बहुशतमाने।रक्तिकाशतपरिमितमित्यर्थः
हिरण्यपरिमाणोन्यत्रापीत्यष्टमेधेसूत्रणात अन्वाहार्यो वेति विकल्पः॥ ॥
संवत्सरं वा यजेत।यावज्जीवं वा पंचदश वर्षाणि वा यजेतेति प्रागुक्तं।अधुना
पक्षांतरमभिधीयते॥अथवा दाक्षायणयज्ञेन संवत्सरं यजेत।संवत्सरमिति
कालाध्वनोरत्यंतसंयोग इति द्वितीया।साकल्येन संयोगश्चात्यंतसंयोग इत्युच्य
तेन सकलं संवत्सरं दाक्षायणयागानुष्ठानेन व्याप्नुयादित्यर्थः।अत्र संवत्सरः॥

Indira Gandhi National
Centre for the Arts

सावनःपरिगृहीतेनचांद्रादिःयतोत्रापिपक्षेस्मिन्वयागसंपत्कर्त्तव्या।पंचदशभि
६८ र्वर्षैर्यावत्यइष्टयोभवंतितावत्यएवसंवत्सरयागपक्षेपिसंपादनीयाः।ताव
त्यश्चसावनएवसंवत्सरेसंपद्यंतेनान्यस्मिन्निति।तत्रैव।प्रथमपौर्णमास्यांश्राद्धा
न्वारंभणीयापूर्वकोग्नीषोमीययागः।पुनरुद्दृत्यससान्नाय्यवद्दर्शपक्रमः।प्रति
पद्याग्नेयेनपुरोडाशेनैंद्राग्नदध्नापयसाचयागः।पक्षेवैमृधः।मासमेवपुनव
र्जनसंकल्पःपुनरुद्दृत्यतस्मिन्नतिपद्दिनएवंद्राग्नयागः।पुनरुद्दृत्यमैत्रावरु
णपयःपयस्यायागउपक्रमः।प्रातर्द्वितीयायामाग्नेयेनमैत्रावरुणपावयागोयथो
क्तःपक्षेआदित्यःचरुः।तदानीमेवपुनरुद्दृत्याग्नीषोमीययागः।ततःपुनरु ६८

द्दृत्याग्नीषोमीययागः॥ततःपुनरुद्दरणादिदर्शयागउपक्रमः।प्रातस्तृतीया
यायामाग्नेयसान्नाय्ययागः।पक्षेवैमृधः।तदानीमेवोद्दृत्यैंद्राग्नयागः।पुन
रुद्दृत्यमैत्रावरुणपउपक्रमः।तदनंतरमादित्याना।इत्येवंप्रकारेणसंवत्स
रयावत्समाप्त्यदंकर्त्तव्यं॥ ॥मा० समानृतमनृतकृतेवासांसिवर्जयेत्।मांसभ
क्षणंनकुर्यात्।स्त्रियंनगच्छेत्॥अनृतंनवदेत्।सूत्रकृतेरजकधौतेवासस्यु
नपरिदधीत।सूत्रकृतमितिकारुधौतं।तत्कृतत्वस्यतन्निर्मितत्वस्यापरिहा
र्यत्वान्नदधीनत्वादेवकरणस्य।एतानिपौर्णमास्यमावास्ययोरंतरालेव
र्जयेत्॥पौर्णमासीतआरम्यामावास्यापर्यंतोयंनियमविधिः॥आहनिमा:

Indira Gandhi National
Centre for the Arts

समैथुनवर्जयेदित्येतत्तु कर्मणा वर्ज्यमानं भवत्येव। अयं तु पूर्वोक्तकालनियमः।
दर्शपूर्णमासप्रकरण एव स एष एव उभयत्राप्युत आग्नेयोऽष्टाकपालः पुरो
६९ डाशो भवतीत्युपक्रम्याम्नास्येव कामसंयोगो विदध्याति। यत्कामो ह वा एतेन य
ज्ञेन यजते सोऽस्मै कामः समृध्यत इममेव कामम् आयन्वप्रकृत्या पांशुत्वं विहि
तमस्ति। स यदीच्छेत्कुर्वीत समन्नदशसामिधेनीरनुब्रूयादुपांशु देवतां यजति
तद्धीच्छेद्रूपं मूर्धन्वत्यौ याज्यानुवाक्ये स्याताम्। वात्रघ्नावाज्यभागौ विराजौ संया
ज्याविति। अस्य चोपांशुत्वं सूत्रकारेणात्र वक्ष्यते तस्य संगो नान्यत्रापि यस्य ग्रस्य
पांशुत्वं भवति तस्योच्यते॥४॥ उपांशु काम्यदेवता। काम्यस्य कर्मणो देवता ६९



न्यैवेति शाखान्तरत्वादुपांशु काम्यमित्येतावदेव सूत्रं कर्तव्यं नदेवताग्रहणं तत्रवा
नदेवतानाम विशेषेण पांशुत्वमाभूत्प्रधानदेवताया एव यथा स्यादिति पुनर्देव
ताग्रहणं॥ ॥आग्रयणो वैश्वदेवः। आग्रयणो यो वैश्वदेवश्चरुः स उपांशु भवति॥
ग्रयण इति विशेषोपादानं त्राग्रय एव॥ ॥एककपालाश्च वारुणाः। वारुण
वर्जिता अन्ये सर्वे एककपालाः पुरोडाशा द्यावापृथिवीयादय उपांशु भवन्ति॥ ॥प्रा
जापत्याः सर्वत्र प्राजापत्यः पशुश्चरुः पुरोडाशो वा उपांशु भवति॥ तस्माद्यत्किंच
प्राजापत्यं यज्ञे क्रियत उपांश्वेव तत्क्रियत इति श्रुतेः॥ ॥सावित्रश्चातुर्मास्ये
पूर्वचातुर्मास्येषु यः सावित्रो द्वादशकपालोऽष्टाकपालो वेति विहितः सावित्रः स

Indira Gandhi National Centre for the Arts

उपांशु भवति॥ चातुर्मास्येष्विति सूक्तत्वादन्यत्र सावित्रस्य नोपांशुता॥५॥ वैश्वदे
७० वी॥ चातुर्मास्येषु या वैश्वदेवपर्व॥ वैश्वदेवोपयस्यासोपांशु भवति॥ ॥ वैश्व
देवीति स्त्रीलिंगनिर्देशाच्चातुर्मास्येषु पाशुकेषु वैश्वदेवः पशुस्तत्पशुपुरोडाश
श्चतद्देवतावनोपांशु भवति॥ ॥वायव्यं शुनासीरीये वायव्यं वायुदेवत्यं हवि
रुपांशु भवति॥ पर्यायस्येत्यनुवर्त्तते। तेनयज्ञातेवायव्यमित्यादौ नोपांशुत्व
भविष्यति। न यवागूपात्र॥ नेवं॥ तेषां वै चतुर्णां हूयमानानां हविःषु निरुक्ता
नि भवन्ति द्वे द्वे हूयोरितिह विः। संबंधेनैवोपांशुत्वविधानात्॥ तेन वायव्यं द्र
व्रिरित्येव व्याख्येयं॥ अतो यवागूप दंष्टेषु पांशुत्वं भवत्येव॥ एवं च वैश्वदेवी॥ ७०

नी२

हविःष्षु पांशु भवंति सावित्रः वैश्वदेवी द्यावापृथिवी पश्चेति॥ वरुणप्रघा
सेषु द्वे सावित्रः काय इत्या साकमेधेषु महाहविषि द्वे सावित्रो वैश्वकर्मण
श्च शुनासीरीये त्री॥ सावित्रो वायव्यः सौर्यश्चेति॥ ॥ ननु हवीःषि समा
अग्नये पवमानाय निर्वपतीत्यादीनि त्रीणि हवींषुक्ता स एतान्निप्रसन्न
रिसूक्तत्वात्॥ अग्नये पवमानाय प्रथमा अग्नये पावकाय अग्नये शुचये इत्युक्ता नी
यत्वतानि त्रीणि॥ ननु हविःष्षु पांशु भवंति तनवोवा एता अस्यास्ये मोदि
ष्टयस्तस्मात्तासु उपांशुकर्त्तव्य इति श्रुतेः अत्र ष्टिग्रहणात्सांगानामिष्टीना
मुपांशुत्वं केचिदाहुः॥ तद्युज्यते। ननु हवींषीति निर्देशात्॥ देवसूदेविका

द्वितीया ४

Indira Gandhi National Centre for the Arts

हवींषीति वत्। तन देवा एता अम्याद्वे यस्य मदिष्ठ यइतीष्टि यं इति।। सर्वेषां
१२ तु देवतानां तेनिर्वेतान। यज्ञाथर्वणो वैकाम्याइष्ट यस्त्वत्रादि समानत्वात्।।
अत्र सूत्रकाराणि: सेदिष्टे देवताया एनोपांशुत्वमुक्तं उपांशुकाम्या देवतेति
।तथाच मानवे।। अभ्यावेयिकस्य इष्टयः सच्छस्कालाः सर्वोउपांशुदेवता इति
।।कात्यकेच।। अन्नयेएव मानाय प्रथमा।। असमेपावकामाम सेशुचये हितीं
या मुमेउपांशुदेवते इति।शाखायनेपि।। सर्वाएपांशु हविष्टेत्युक्तं। नतु सर्वो
उपांभवंतीति।। अतस्तत्तु हविः घ्वापि देवतेवा पांशु। नसकला इष्टयइति।।
।।दीक्षणीयाप्रायणीयातिथ्या देवताः। दीक्षणीयादीनां देवताउपांशुभ १२

वेतिउपांशुत्वरेति प्रागाग्नीषोमीयादित्यस्मिन्पक्षेदीक्षणीयादीनां सकला
नामिष्टीनां सदेवताकानामुपांशुत्वंसिद्धमेव। यदातु वा सतेन वा दीक्षणी
यानीचेस्रगानीचेस्तगामितरे इति पक्षस्तदा दीक्षणीयादिदेवतानामुपांशुत्व
विधानार्थमिदं सूत्रं।। ।। देवसूदेविकाहवींषि वक्ष्यति।। अग्नीषोमीयस्यपशु
पुरोडाशमनु देवसूहवींषि निर्वपतीति। पशुपुरोडाशमत्वनूवंध्यस्य देविका
हवींषि निर्वपतीति च। इमानि देवसूहवींषि देविकाहवींषि च उपांशु भ
वंति। उभयत्रोपांशुत्वेतानीष्टीति श्रुतत्वात्।। ।।वायव्यानि।। अग्नौत्वयने
वायवेवा निरुप्यं तेष्वेतत्स्मुदीति अयंवायव्यः सउपांशुभवति।। ।।मंत्रा

वरुणीच। अमावेव॥ अंते एयस्या मैत्रावरुणी-तूपरमिथुनं दक्षिणोदवसानी
यांतइतियामैत्रावरुणी॥ सोपांशु भवति। अथ मैत्रावरुणापाययस्थयायजंत
७२ इत्युमक्तम्यो पांशु भवत्सु पांशु माहरेतः। सिच्यत इतिश्रुतत्वात्॥ ॥ ऐंद्रः सौत्रा
नरुणायांपूर्व सः॥ सौत्रामणापाप्रथम ऐंद्रः पशुरुपांशु भवति। त्रिपशुमध्ये
वर्त्तमानस्यैंद्रस्य पशुइत्यस्यधाराध्वर्थप्रथम इत्युक्तं॥ ॥ वायोधमसश्च॥ सौत्रा
मण्यामेव तदैंते पशुरिंद्रायवयोधसइति वायोधसः पशुरुपांशु भवति॥ त्रि
पशुमध्येवर्त्तमानस्यैंद्रस्य पशुइत्यस्य स्वधाराध्वर्थप्रथम इत्युक्तं॥ ॥ वायोधम
श्च॥ सौत्रामण्यामेव तदैंते पशुरिंद्रायवयोधसइति वायोधसः पशुरुपांशु ७२

भवति। लोकोनवयोधाय स्मात्सो निरुक्त इति श्रुतः॥ ॥ आग्नेयप्रतिकाममा
हरेत। आग्नेयमष्टाकपाले पुरोडाशं प्रतिकाममाहरेत। कुर्यात कामं कामप्र
तिपशिकामयन्किंचित्कामयते तत्प्यसर्वस्यमाग्नेकोयमित्यर्थः। इममेवप्रक्रा
न्तस्क्रतौ पद्यते। यत्कामोदेवा एतेनयज्ञेन यजते सोस्मै कामः समृध्यत इति॥ व
र्षार्थप्रक्रतौ वा ब्रूयाद्वृष्टिकामास्मीति। आग्नेयं प्रतिकाममाहरेतेत्युक्तं॥ ते
नुक्तं। तेन वृष्टिकामस्याग्नेयः प्राप्नोति। तत्र विशेष उच्यते। वर्षार्थवृष्टये
आग्नेयेष्टिसमाप्ययजमान उद्धरणकाले त्विजः प्रति एवं ब्रूयाद्वृष्टिका
मोस्मीति॥ अथवा प्रक्रतौ प्राक्रतदर्शपूर्णमासेष्टावेवैवं ब्रूयात्॥ तेनैवं

Indira Gandhi National
Centre for the Arts

सिद्धो वृष्टिकामः शुष्कगान्वेषी। मिष्टिकु[illegible]रणीति। अथवा प्रकृतो प्राकृत दर्शपू
र्णमासेष्टावेवं ब्रूयात्॥ तेनैव सिद्धो वृष्टिकामप्रयोगः। प्रकृतावेव वा वृष्टिकामो
७३ स्मीत्यादिकं अधिकं कुर्यादित्याश्वलायनव्याख्यानलिप्सः। अध्वर्युर्ब्रूयात् पुरोवातं
च विद्युतं च मनसा ध्यायेति। प्राकृत्याज्ये भ्यो वर्षं प्रतिपज्जमानो ब्रूयात्। पुरोवा
तं च विद्युतं च मनसा ध्यायेत्येवं॥ ॥ अग्नीध्रः। अग्नीध्र मनसा ध्यायेत्यग्नी
ध्र इति यजमानो ब्रूयात्॥ ॥ स्तनयित्नुं च वर्षं चेति होतारं। स्तनयित्नुं च वर्षं च म
नसा ध्यायेति यजमानो ब्रूयात्॥ ॥ सर्वाण्येतानीति ब्रह्माणं॥ ॥ यजमान
एव ब्रह्माणं प्रति सर्वाण्येतानि मनसा ध्यायेति ब्रूयात्॥ एतानीति वेंतछद्दः ७२

प्राग्वत्पुरोवातं चेत्यादिपरः। नेतानीत्येवं विधिप्रशान्तपरः॥ तेन पुरोवातं च
विद्युतं चाग्नीध्राणि स्तनयित्नुं च वर्षं च मनसा ध्यायेत्येवं ब्रह्माणं प्रति ब्रूयादि
ति केचित्॥ यथाश्रुतमेवेत्यपरे। सर्वाण्येतानि मनसा ध्यायेति ब्रह्माणमि
त्येवं विधस्यैव श्रुतत्वात्। स यदि वृष्टिकामः स्याद्यदीष्टा वा यजेतेति प्रैष्य ऋ४
सर्वमेतद्दृश्यंते। दर्शपूर्णमासयोराश्वलायनस्य सर्वकामार्थत्वाद्वृष्टिकामना
यामयं विशेषउभयोरुक्तः॥ ॥ अन्वारंभणीया प्राग्वेष्टव एकादशकपा
लः [illegible] सरस्वत्यै चरुः सरस्वते द्वादशकपालो दर्शपूर्णमासारंभे। दर्श
पूर्णमासारंभे प्रथमप्रयोगे अन्वारंभणीयाइष्टिर्भवति॥ उद्धरणादिकं

Indira Gandhi National Centre for the Arts

र्शपौर्णमासौ। तत्र श्री।ाहवीष्णुपदिशता। आग्नावैष्णवः अग्नाविष्णू देवत एका
दशकपालः पुरोडाशः प्रथमं हविर्भवति। सरस्वत्यै चरुर्द्वितीयं हविर्भवति। स
७४ रस्वते द्वादशकपालः पुरोडाशस्तृतीयं हविर्भवति। चरुशब्देन। नवस्थाविताम्रा
घ्मपक्वविशददृब्रीहितण्डुलसिद्धः। ओदन उच्यते। ओदनो हि चरुरिति श्रुतेः।
स्थाली तु तत्संवेष्टात्तल्लुप्यते सलेपं चरुमित्यादौ। तत्र चैते प्राकृताः पदार्था
न भवंति। पेषणं यवनं वापस्तापश्चोपहितः प्रथा मार्जनाध्यूहनज्वालनतथा ह्वा
भ्युहृत्यसादनमिति॥ अस्यार्थः। पेषणं चूर्णनं। यवनं पिष्टस्योदकमिश्रणं
वापः उदकमिश्रणाय पात्र्यां प्रक्षेपः। तापः कपालानामंगारैः प्रतापनं। उ ७४

पहितिरंगारेषु कपालस्थापनं। प्रथा। कपाले धृतस्थापितस्य पुरोडाशस्य हस्त
संबाधेन सर्वेषु प्रसारणं। मार्जनं श्लक्ष्णीकरणं। अध्यूहनं भस्मनांगारै
श्चोपरिष्टाच्छादनं॥ ज्वालादर्भैरवज्वालनं। अभ्युहृत्यसादनं। कपालेभ्यः पृथक्कृ
त्य पुरोडाशवत्पात्र्यामासादनं॥ चरुलक्षणं छंदोगपरिशिष्टे। स्वशाखोक्त
श्चसुस्विन्नो दग्धोकठिनः शुभः। न चातिशिथिलः पाच्यो न चरुश्चारसस्त
थेति स्थालीलक्षणमपि तत्रैवोक्तं॥ तिर्यगूर्ध्वसमिन्मात्रा दृढा नाति
विशालमुखी। मृण्मयी। मृन्मय्योदुम्बरी वापि चरुस्थाली प्रशस्यते। तथा मेक्षणं
नचशरवदानं कार्यं। तल्लक्षणमपि तत्रैवोक्तं। एष्मजातीयमिध्मार्द्धप्रमा

Indira Gandhi National
Centre for the Arts

णामेष्टंणां भवेत्। इत्त्वंचायुष्टपृष्ट्यवयमेवदानक्रियाक्समभीति। इयंचाधानानं
तरंप्रथमपौर्णमा तस्त्राह्मानंतरंपूर्वोक्त एवसद्योभवति। द्वादशरात्रमाधिनि
७५ धाणामश्वेतपौर्णमासीभवति। तदातेष्ववध्यतम्य निषुत्रेन्वारंभणीमा
पौर्णमासेष्टिश्च कार्या॥ अन्यथा एषकृष्ठायुद्गत्या। आरंभइत्युक्तत्वात्प्रथ
मप्रयोगएवान्वारंभणीया। दर्शपूर्णमासावारंभमाणोन्वारंभणीययाय
यजेतेतिशाखांतरात्॥ इयंचदर्शपूर्णमासविकारेष्वसर्वेष्वपिप्रथमारं
भेभवति। तत्रनित्यानामारंभेसकृत्॥ काम्यानांचारंभेपुनः कार्या सोमस्यो
त्रामणीवर्ज्यं। तथाचोक्तं। नित्यानांसकृदारंभेकाम्यानांचपुनःपुनः। सोम

सौत्रामणीवर्जमन्वारंभःप्रशस्यतइति। अत्रमानवसूत्रेविशेषः। मेष्टणे
नचरूणाःस्विष्टकृतेसमवद्यतांडायेवमिथुनौगावौदक्षिणा। मृक्तेवाकेम
मेष्टणामन्वधास्यतीति॥ ॥पष्ठौहीदक्षिणामिथुनौवा। अस्यामन्वारंभ
णीयायां। पष्ठौहीनोर्द्दक्षिणा॥ मिथुनौमिनाहीगावौस्त्रीपुरुषरूपौवा पु
दक्षिणा॥ पष्ठौहीबालगर्भिणीत्यमरः। बालैवयागर्भिणी सापष्ठौहीत्यु
च्यते॥ ॥अथवा मिथुनौमिथुनाहीगावौस्त्रीगवीपुंगवश्चदक्षिणा॥
नुमिथुनशब्देस्त्रीपुमांसुच्यते द्विवचनात्तुद्वेस्त्रीपुंयुग्मेकुतोनभवतः उ
च्यते॥ मिथुनौतेगावौ। तिग्मस्मादत्रनिश्चितएकस्यवस्त्रीपुंयुग्म

Indira Gandhi National Centre for the Arts

स्याद्दर्शनात्। अत्रापि तथा दर्शनात्॥ ॥इन्द्राग्नमविमृध एकादशकपालः पौर्ण
१६ मासमनुः पौर्णमासमनु पौर्णमासेष्टिसमाप्त्यनंतरं तदानीमेव इन्द्राय विमृ
ध एकादशकपालः पुरोडाशो भवति। उद्धरणादिकर्मणि एव ग्रीतः॥ ॥आदि
विकल्पः। कीदृशो वैमृधः। आदिविकल्पः। आदावारंभ एव विकल्पो यस्य
स तथा। आरभ्यते न वेति। यद्यारभ्यते तदा यावज्जीवं क्रियत एव। नारभ्यते
चेत्कदापि न क्रियते एवेति। तथा चोक्तं॥ रूपं कालोनुनिर्वाप्यः अयणं देव
ता तथा। आदौ मतिदृतः पश्चात्त इमे सर्वदा स्मृता इति॥ इमे पञ्चैवादिवि
कल्पाः। अन्ये सर्वेपीच्छाविकल्पाः रूपं दर्शपूर्णमासदाक्षायणादिका

लक्षहितानुदिता [illegible] आदिः। अनुनिर्वाप्यः विमृध आदित्यश्च। अयणं गार्हपत्ये
आहवनीये वेति। देवता इन्द्रो महेन्द्रो वेति। एतेषां मध्ये यस्यासौ स्वीकारः कृ
तः स एव सर्वदा भवति न यज्ञांतरे॥ ॥आदित्यश्चरुरामावास्यं। अमावा
स्यमनु अमावास्येष्टिसमाप्त्यनंतरं तदानीमेव वैष्णवयुक्त्य आदित्यश्चरुः क
र्मापवर्गीतो भवति। अन्वाहार्यदक्षिणा एव। अयमप्यादिविकल्प एव। पू
र्वे निर्वपतीति विधाय तस्मान्नानुनिर्वपेदित्युभयोर्विहितप्रतिषिद्धत्वा
त्॥ ॥दाक्षायणयज्ञस्यापि दर्शपूर्णमासत्वात्तत्र स्थेपि विमृध आदित्यो
विकल्पेन भवत एव॥ ॥अथाग्रयणं सूत्रयति॥ ॥५॥ आग्रयणमैन्द्रा

Indira Gandhi National
Centre for the Arts

यमग्रपा कस्य व्रीहीणां यवानां चाग्रयणमिति तस्य माणस्य कर्मणः संज्ञा
११ संव्यवहारार्था । तो ग्रयण इत्यादौ । व्रीहीणां यवानां चाग्रपाकस्य प्रथमपाकस्या
ग्रयणसंज्ञं कर्म भवति । तत्र च प्रथमं हविरैन्द्राग्नं ऐन्द्राग्न एकादशकपालः पुरोडाशो
भवति । तं विन्द्राग्नी ऽदजयतां तस्मादैन्द्राग्नो द्वादशकपालः पुरोडाशो भवतीति श्रु
तेः । शरदि व्रीह्याग्रयणं । वसन्ते च यवाग्रयणमिति केचि[illegible] । केचिदग्रपाकस्य
त्वनुरोधात्प्रथमपक्वव्रीहियवादिसंपत्तिकाल एव कुर्वन्ति । तथा चोक्तं । शांखा
यनब्राह्मणे । अथ व्रीहिसस्येनापवसस्यैव आगत इति तथा वर्षास्वगते श्यामा
कसस्य पक्वेषु वेणुयवेष्विति च वितानसूत्रे चापक्वात्सोषधीषाग्रयणोष्टिरि

ति । अत एव यथोक्तं कात्यायनेन । शरद्वसंतयोः केचिन्नवयज्ञं प्रचक्षते धान्यपा
कवशादन्ये श्यामाको वनिनः स्मृत इति । ननु व्रीहीन्यवान्वा हविषीति प्रागुक्तत्वा
दग्रपाकस्येत्येतावतैवोक्ते पि व्रीहीणां यवानामग्रपाकस्येति सिध्यति । किमर्थं
व्रीहीणां यवानामिति ग्रहणं । उच्यते । विश्वेदेवश्चरुरिति वक्ष्यति । सोपि यव
योर्यथा स्यादिति यवानामित्युक्तं । अन्यथौदनशब्दस्य व्रीहितंडुलसिद्धान्ने
ओ२ रूढत्वात् तदनो हि चरुरिति श्रुतेश्चरोरोदनत्वाद्यवाग्रयणे विश्वे चरुर्व्रीहितंडु
लमय एव स्यात् । अत एव मन्त्रादन्यत्र वचनाभावे व्रीहिमय एव चरुर्भवतीति
गम्यते । तेनात्र यवानामित्युक्तं । एतावत्येवोक्ते तेषामेवाग्रयणमिति नियमे

Indira Gandhi National
Centre for the Arts

मा भूदिति ब्रीहीणामित्युक्तं ॥ ॥वैश्वदेवश्चरुः॥ इतीयं हविर्वैश्वदेवश्चरुर्भव

१८ अस्य चोपांशुत्वमुक्तमाग्रयणे वैश्वदेव इति ॥ ॥पयसि वा। वैश्वदेवश्चरुः पय

सि दुग्धे वा श्रप्यते। वा उदके। तत्र पयःपक्षे दुग्धोपसर्जनी निनयनमंत्र उदनीयः

संपयन्तु पयोभिः समोषधयो रसेन सं रेवतीर्जगतीभिः पृच्यतां सं मधुमन्म

धुम [illegible] तीभिः पृच्यतामिति ॥ ॥द्यावापृथिवीय एककपालः॥ इतीयं हवि

र्द्यावापृथिवीय एककपालः पुरोडाशो भवति। अस्य चोपांशुत्वमुक्तमेकक

पालश्चावारुणाद् इति॥ ॥उद्वास्यातांश्छादयेदाज्येन। द्यावापृथिवीयं

उद्वास्य प्राणदानानन्तरमस्य द्यावापृथिवीयस्यातान्। आज्येन लौकिकाज्ये

न घृतेनाच्छादयेत। प्राकृतं च विकृतावित्यनेन प्रथमप्राणदानेन तत्ताच्छा

नमिति। अस्य द्यावापृथिवीयस्य सर्वस्यावदानं। उपरिष्टाद्धिरभिघारणी

चतुरवत्तत्वसंपादनाय। पंचावत्तत्वसंपादनाय तु उपस्तारोपिर्हिः कर्त्त

व्यः। छंदोगगृह्ये तथादर्शनात। सर्वहोमः तथा प्रपत्रेन होमः कर्त्तव्यो य

थान पर्यावर्तेत उत्तानो न भवति॥ आपस्तंबः॥ यदि ऊतः पर्यावर्तेत न स्क

वोग्रणाकल्पयेन्नपाणिना। आदायाभिघार्य पुनर्होतव्य इत्येके॥ मनव॥

एककपालमन्यस्यां पात्र्यामलंकुर्वन्नभिपूरयति। प्रचरणवेलायां वर्हिषि

सादयित्वोपस्तीर्य एककपाले सकृत्सर्वमवदायाशयस्यान्वा सिंच्याभि

Indira Gandhi National
Centre for the Arts

रभिघार्यौ पांश्चेकं कपालेन प्रचर्यैव सङ्कृतेन मध्ये पाणिनाञ्जुहोत्स्रुलं प्रति
१८ ष्ठितमाशयेनाभिजुहोतीति। अस्य च वैश्वदेविकद्यावापृथिवीयप्रकृति
त्वं जैमिनिनोक्तं। एककपालानां वैश्वदेविकः प्रकृतिराग्रयणे सर्वहोमा
परिश्रितदर्शनादिति। पक्षांतरमाह॥ ॥आज्यस्य वा यजेत॥ अथवा द्या
वापृथिवीयमाज्यस्य यजेत॥ आज्यमेव ध्रुवायाश्चतुरवत्तमेव दामयया।
गः कर्त्तव्यः। न पुरोडाशेन। तस्मादाज्यस्यैव यजेदिति वचनात्॥ आज्ययाग
पक्षेप्युपांशुत्वं भवत्येव। शाखांतरे यागसंबंधेनैवोपांशुत्वस्य दर्शना
त्॥ वैश्वदेवद्यावापृथिवीयावोपांश्विति॥ ॥पुराणानां वा चरुः अ

यवा वैश्वदेवश्चरुः पुराणानां जीर्णानामेव यवानामेवमवानां व्रीहीणां
वकर्त्तव्यो वा नवानामिति तुल्यो विकल्पः। ऐंद्राग्नद्यावापृथिवीयो पुरोडा
शो नवानामेव। चरुग्रहणात्॥ प्रथमजो गौर्दक्षिणा। अस्मिन्व्रीहिय
वाग्रयणे प्रथमजो गौर्दक्षिणा। तस्मिन्वर्षे जायमानानां वत्सानां यज्जमा
नस्य गोष्ठे यः प्रथमो जातो वत्सः स दक्षिणा॥ येप्रादीनमेका एकयाव
न्मा जायेते तेषां प्रथमजं ददातीत्यापस्तंबः॥ वत्सः प्रथमजो दक्षिणेति स्म २
शांखायनः। इदं चाग्रयणमेकमेव शरद्वसंतयोरप्यनादेवनेकत्वात्तद
र्शपूर्णमासवत्तनं व्रीहियवरूपसाधनद्वयमेदाद्विकर्मत्वे दर्शपू

Indira Gandhi National
Centre for the Arts

८०

णमासवतनचङ्गीहिप्रवरूपसाधनद्वयमेदे [illegible] पिदर्शपू
र्णमासयोर्न्नैमित्तकर्मिता एव माग्रयणयोरपीति तेन द्वयोरैकैवान्वाहार्यं भणी
या भवति। अग्निकारमुपजीवन्नाह॥ ॥वैश्वदेवस्य चा वैश्वदेवमिति चातु
र्मास्यानां प्रथमं पर्व। एतद्वैश्वदेवमित्युक्तत्वात्। तत्र वैश्वदेवे पर्वणि च
कारात्प्रथमजो वत्सो दक्षिणा। तत्रामिहविर्यज्ञो हि तस्य प्रथमजो गो दक्षि
णेति श्रुतेः॥ ॥दर्शपूर्णमासानीजानो दक्षिणाग्निपक्वं चातुष्प्राश्यं ब्रा
ह्मणान्भोजयेत्किंचिद्दद्यात्। सूतकसूतकाद्यादिनिमित्तवशाद्दर्शपूर्णमा
सौ भोत्कर्षसति अग्रयणकाल आगते तदतिक्रमशंकायामयं प्रकारः।

दर्शपूर्णमासानीजानः निमित्तवशाद्दर्शपूर्णमासाभ्यामनिष्ट्वा यज
मानो नवमन्नं व्रीहियवरूपं दक्षिणाग्निपक्वं दाक्षिणाग्नौ पक्त्वा किंप्र
माणमत्र चातुष्प्राश्यं वनुर्णां नितान्तिमर्यानु चतुरो ब्राह्मणान्भोजयेत्॥
तेभ्यो भुक्तवद्भ्यः किंचिद्यथाशक्ति दक्षिणां दद्यात्। अत्र ब्राह्मणाशने
नैवाग्रयणं सिध्यतीत्यभिप्रायः॥ तद्यथा वषट्कृतं हुतमेवमस्यैतद्भु
क्तमिति श्रुतेः। यद्यनग्रयणेनीजानः स्याच्चातुष्प्राश्यमेवैतमोदनमन्वाहा
र्यपचने पचेयुस्ते ब्राह्मणा अश्नीयुरिति। तत्रोप्युक्तं कुर्यात्तद्दद्यात्तदादि
णां हविः स्यादित्याङ्कुरितिवच्छ्रवणात्॥ एवं तत्र वैश्यं [illegible]

Indira Gandhi National
Centre for the Arts

८०

दर्शपूर्णमासारंभोक्तो वेद्योयं चैत्र्यामारंभेन्कृते दर्शेष्ट्यनंतरं वैशाखेत्रा
ग्रयणस्य कर्तुं शक्यत्वात्॥ वैशाखे दर्शपूर्णमासारंभे च तदनंतरं ज्ये
ष्ठे वसंताभावादाग्रयणकालातिक्रमः स्यादित्ययं प्रकारोनुष्ठेयः॥ अ
स्याथाग्रयणत्वात्पौर्णमास्याममावास्यायां वानुष्ठानमिति। यद्वा
ग्रयणेनेत्याग्रयणाग्रहणस्यैवमशक्यत्वात्॥ इष्टिरूपस्याग्रयणस्य य
इष्ट्यात्मनेनैव कालस्य सिद्धत्वात्॥ ॥अग्निहोत्रायणिनो नवैः सायं
प्रातरग्निहोत्रहोमः। पूर्वं त्वनुक्तमग्निहोत्रमेव वा जुहुयादिति। त्रि॰श
तो नवेभ्य उद्धं दर्शपूर्णमासोत्सर्गे कृते आग्रयणस्य प्रकारमाह॥ अ

ग्निहोत्रायणिनः यस्याग्निहोत्रमेवायने नान्यानि कर्माणि सोग्निहोत्राय
णी। अग्निहोत्रमेवेत्येवकारस्येतरव्यावृत्त्यर्थत्वात्। तस्याग्निहोत्रायणि
नो यजमानस्य नवैर्व्रीहियवान्नैः सायंप्रातरग्निहोत्रहोमो भवति आग्र
यणकाले कश्चिदन्यपक्षेदं सूत्रं व्याचक्षते। अग्निहोत्रेण वाग्निहोमेनैवाग्र
यणं आग्रयणप्राप्ति आग्रयणासिद्धिं यदि इच्छति सोग्निहोत्रायणी तस्यैवं क
र्तव्यं। अनुसृष्टदर्शपूर्णमासस्यापि एतदपि युक्तं। शाखांतरे सामान्येनै
वोक्तत्वात्॥ ॥ नवान्नाशिताया वा पयसा। नवमाशिता तदाशिता तस्या
नवान्नं खादितायाः गोः। पयसा वा सायंप्रातरग्निहोत्रहोमः कर्त्तव्यः॥ ॥

Indira Gandhi National
Centre for the Arts

॥ ॥दीक्षितव्रतेन वा ॥ पूर्वे सरदीक्षादौ यज्ञे प्रारब्धे आग्रयणकालातिक्रमशं
८२ कायां नवान्नेन दीक्षितव्रतं कर्त्तव्यं ॥ तेनैवाग्रयणस्य सिद्धिः। एतदप्याग्रय
णकाल एव॥ ॥उपसत्सु रोहिणौ कुर्वीत ॥ सेनस्नरोपसत्कादौ यज्ञे उप
सत्सु आग्रयणकाले प्रवर्ग्येन नवान्नेन रोहिणौ पुरोडाशौ कर्त्तव्यौ। ताभ्यामेवा
ग्रयणसिद्धिः। एतदप्याग्रयणकाल एव॥ ॥सुत्यासु सवनीयान्॥ सव
स्सरसुत्यादौ आग्रयणकाले नवान्नेन सवनीयपुरोडाशान् कुर्वीत॥ ॥
सोम्यः श्यामाकश्चरुरारणस्य। आरणस्य स्थाने स्यादाग्रयणं सोम्यः। सो
मदेवताकः श्यामाकचरुर्भवति॥ एतच्च वर्षासु शरदि वा भवति। शाखा

न्तरात्॥ श्यामाकाग्रपाकस्य तदानीमेव भावत्वात् तदाहापस्तम्बः॥ वर्षासु
श्यामाकैर्यजेतेति। मानवे विशेषः। शरदि सोमाय श्यामाकानामिति। शा
खापनत्राह्लणेच। अथात आग्रयणस्याग्रयणं नाम्ना घकासोयजेत वर्ष
स्वागितेश्यामाकसस्ये श्यामाकानुद्धृत्य च आहेति॥ ॥आपस्तम्बसूत्रे चा
यं समानतन्त्र उक्तः। सि। नानिष्ट्वाग्रयणेनाहिताग्निर्नवस्याश्नीयाद्ब्रीही
णां यवानां श्यामाकानां। नित्यग्रपाकस्य यजेत मासावास्यां पौर्णमास्यां
वा स्यां तन्त्रं सप्तदश सामिधेन्यो निर्वपणकाले आग्नेयमष्टाकपालमिति
विज्ञायते न वा नानि... नरोपिंडाग्ने द्वादशकपालमाग्नेन्द्रं वा वैश्वदेवं पय

Indira Gandhi National
Centre for the Arts

सिचरुं सोम्यं श्यामाकं चरुं द्यावापृथिव्यमेककपालं पुरस्ताद्द्यावापृथिव्य
८३ मेके समामनंतीति अग्निहोत्रेत्रोपि विकल्पेन तनैवोक्तः॥ यदि नानांतत्राश्या
माकेष्टिं कुर्वीतेति॥ ॥वैणवाग्नीष्मोग्नीष्मेज्रुतो वैणवो वैशायवमयः॥
सोमस्य चरुर्भवति । सोमस्य चरुरित्यनुवर्त्तते । शांखायनश्चात्र तु विशेषः ।
अपवसंतमागतं पक्षेषु वैणुयवेषु वैणुमवान्नुहृत्त्वैश्चाहेति प्रकृत्य
तस्या एतदेवपर्वैतत्तंत्रतः अग्निहोत्रं जुहुयात्तन्नवानामुभयस्यास्थ्याः अपिवा
स्थालीपाकमेव गार्हपत्ये श्रपयित्वा नवानामेताभ्य आग्रयणदेवता
भ्य आहवनीये जुहुयात् स्विष्टकृच्चतुर्थीभ्यो द्येत्स्वाहा पुष्टास्याहेति

देवतानामपरिहाणायापि वाग्निहोत्रीमेव नवानां दयित्वात स्यैदुग्धेन सा
यं प्रातरग्निहोत्रं जुहुयादुभयस्याग्नौ एतएतावंतः पातालं सयेन कामये
त तेन यजेतेति । तत्सूत्रे च । समानतंत्रा वा दर्शपूर्णमासाभ्यां दर्शपूर्णमासे
वा नवानामग्निहोत्रं वा यवाग्वा सायं प्रातरग्निहोत्रीं वा नवानादयित्वा त
स्यै दुग्धेन सायं प्रातरग्निहोत्रं जुहुयाद्गार्हपत्ये वा स्थालीपाकं श्रपयित्वा
ग्रयणदेवताभ्यः स्विष्टकृच्चतुर्थीभ्य आहवनीये जुहुयादिति । आह
वनीये जुहुयादिति आपस्तंबः । अपिवामावास्यापौर्णमास्यां वाग्रय
णेष्टिमन्वायातयेद् पिवापौर्णमासीममावास्यां वा नवैर्यजेतापि वाऽ

Indira Gandhi National
Centre for the Arts

मिहोत्रीव्रीहि सांवंयवैः वेवायामपित्वा तस्याः पयसा सायंप्रातर्जुहुयादपि
वानेवानीयवाग्वा सायंप्रातर्जुहुयादपि वानीस्थालीपाकं श्रपयित्वाहवनी
८२ येर्जुहुयादाग्रयणादेवताभ्यः स्विष्टकृच — तुर्थीभ्यो पिवानवानो चतुः
शरावमोदनं एत्वा चतुरो ब्राह्मणान्भो — जायदेवं यवैर्यजेत तत्रा
ग्रेयपश्यामाकानभवतइति । तथाश्वलायनः तरं दर्शपूर्णमासयोरीज्यनि
यमस्तेनैवाभयत्रेतेहवैस्तुप्रवरतमाभवन्तीति बह्वृचब्राह्मणम् । वर्षासु श्यामा
कैर्यजेत शरदि व्रीहिभिर्वसन्ते यवैरिति ॥ कालांतरमथाग्रयणस्य बह्वृचब्रा
ह्मणोक्तं यतो यघ्कनक्षेत्रमुपेत्स्पूर्वपक्षे नक्षत्रमुदीक्ष्य यस्मिन्नक्षत्रे का

अत्र ग्रंथस्त्रुटितः

मयेत तस्मिन्यजेतेति ॥ ॥८॥ अमावास्यामामग्न्याधेयं अग्न्याधेयमिति वक्ष्य
माणस्य कर्मणः संज्ञा संख्यवहारार्था । कुरुक्षेत्रपरीणाहः स्थलेग्न्याधेयमि
त्यादौ । साचाग्न्यगारकरणादीक्षितस्य कर्मसमुदायस्य संज्ञा । नमथनमात्र
स्यस्थापनमात्रस्य वा । तत्राग्न्याधेयममावास्यायां भवति अत्रामावास्या
शब्देन गौणार्थत्यागः तिपदुच्यते । कुतः । श्रुतौ तथा दर्शनात् । सयामावास्या
या मनीश्राधत्ते इति प्रकृत्य यदहर्वै न पुरस्तान्न पश्चाद्दृश्येत तदहरु
वसेत्तर्हि ह्येष इमं लोकमागच्छतीति मुख्यामावास्यायामुपवासे वक्ष्य
ति । अत्रोपवासशब्देन यमनियमयुक्तावस्थानमुच्यते । यदहर्स्यश्च

न्वाधेयं स्यात् हि वैवाध्येयात्। अथ जाग्रति जाग्रति देवा इत्यादिकं। तेनोप
८५ वसथं यमनियमयुक्तो भवेदित्यर्थः। तस्मान्मुख्यामावास्यायामन्वाधानं दि
नं श्वोदना तत उपक्रम्य प्रतिपद्याधानं कार्यं। नक्षत्राधानपक्षे तु पूर्वदिने न
प क्रमः नक्षत्रदिने मंथनं॥ ॥अथाग्नीनामाधानमानउपवसथः पूर्वो पौर्णमा
सीमुत्तरामावास्या नक्षत्रे चेति शाखांतरे। आपस्तंबः। पौर्णमास्यां तु पू
र्वस्मिन्नपर्वणि सेष्टि सान्वारम्भणीयमपर्वण्यभ्यो भूते पौर्णमासेन यजेत
इति। काठके। आधानं चेत्पौर्णमास्यां पूर्वां तन्तुदेवतान्यउपवसेदुत्तरा
मन्वारम्भणीयायै पर्वणीचेति। अतश्च पौर्णमास्याधाने चतुर्दश्यामुपवा

साधुपक्रमः। पौर्णमास्याममत्यन्निरिष्टयश्च। श्वोन्वारम्भणीया पौर्णमा स्यामा
संचेति। पूर्वदिने वा पौर्णमास्यामन्वारम्भणीयेति सिद्धं। कठसूत्रे॥ पौर्णमा
दधानः पूर्वामुपोष्याधायायाश्वो वेयेष्टिभिरिष्ट्वाज्जुहृदग्निहोत्रमुपतिष्ठता
नोवसति श्वोन्वारम्भणीया पौर्णमासं चेति। मानवे॥ पौर्णमास्यामाधाय
न्सोपवासमथामारम्भणीयां कृत्वा मध्यः कालयथा पौर्णमास्यायजेतामा
वास्यामाधायनक्षत्रे वा पौर्णमासीमुपोष्यारम्भणीयां कुर्वीतोत्तरामु
पोष्या पौर्णमास्यायजेतेति॥ ॥कृत्तिका रोहिणी मृगशिरः फल्गुनीषु
कृत्तिकासु रोहिण्यां मृगशिरसि फल्गुनीषु वा। एतेषु नक्षत्रेषु अग्न्याधेयं भ

Indira Gandhi National
Centre for the Arts

भवति। अयममावास्योपायमह विकल्पः। कृत्तिकास्वग्नीनादधीत रोहि-
८६ णीषु मग्नीनादधीतेत्येवमादिभिर्वाक्यैः स्वतंत्रेष्वेव नक्षत्रेषु आधानविधाना-
तानक्षत्रमावास्याया आमवेत पुनः नक्षत्रेष्विति समुच्चय एव कथं न भवति॥ नैवं
उदितानुदितहोमवदमावास्याविधानक्षत्राधाननिंदयामावास्यासंस्त-
वात्यन्तं तरतापत्तीतेः। तथाहि यामावास्यायामग्नीनाधत्ते यथा विहिता-
दं हारिद्रागा पुरं प्रपद्यते सततन एव स्वर्ग्ये लोके भियादेवं तदित्यमावास्याया-
माधानेनविदधानक्षत्राधाननिंदयासमतीति। अथ यो नक्षत्र आधत्ते यथा
पिहिताया द्वार्यद्वारा पुरं प्रपित्सेत्स जिह्मः स्यादेवं तदिति प्रपित्सेत्त ए-

तु प्रवेष्टुमिच्छेत सपुरोभाग एव जिह्मः वक्रः प्रतिहतगतिर्भवतीत्यर्थः॥ त-
स्माद्विकल्प एवान समुच्चयः॥ ॥ हस्तो लाभकामस्य। लाभकामस्य यज-
मानस्य हस्तोत नक्षत्रे आधानकालः यद्भेत्प्रमेदीयत इति प्रकर्षेण प्रशस्य-
योगाल्लाभशब्देन प्रतिग्रहेणार्थप्राप्तिरुच्यते॥ तेनायं ब्राह्मणस्यैव कालः
प्रतिग्रहस्य ब्राह्मणस्यैवोक्तत्वात्॥ ॥ चित्रा च क्षत्रियस्य। वकाराल्लाभ-
काराल्लाभकामस्य क्षत्रियस्य यजमानस्य चित्रा नक्षत्रमप्याधेयस्य काला
भवति॥ ॥ ज्योतिःशास्त्रे। अग्नेः परिग्रहं कुर्याद्विशाखा कृत्तिका मृगे
रेवती रोहिणी पुष्येष्वेषाप्यामुत्तरात्रये। व्यवहारसारे। अग्न्याधानं द्विजे-

Indira Gandhi National Centre for the Arts

ग्राणांस्यान्कृत्तिकाविशाखयोः॥ रेवतीरोहिणीपुष्यमृगाद्येष्ठान्नरात्रये। कारिका
यां मात्रादियंच मा सपुश्रावणो वाश्विने तथा। कुर्यान्मृगान्नमांगो वा आश्मनस्तु
लोमसक्षतः। हस्तद्वये विशाखासु कृत्तिकादित्रये तथा। पुनर्वसुद्वये तद्वद्वतीषु
नगासुच भौमार्कि वर्जितवारेनाधिमामतथाद्वये। चंद्रेनुकूलेषु वीक्ष्यरिक्ता
विष्टिविवर्जिते। इति॥ ॥शाखांतरगृह्येपिनक्षत्रेषुधानं श्रूयते। तद्य
था। आपस्तंबः। हस्तेयः कामयेतप्रमेदीयतेति चित्रायां राजन्या भ्रातृव्यवांछि
शाषयोः प्रजाकामा। अनुराधे ऋद्धिकामः श्रवणे पुष्टिकामः उत्तरयोः प्रोष्ठपदे
पुष्पाति ष्ठाकामः सर्वाणि नित्यवदेके समामनंतीति॥ तथाश्रमावास्यायां पौर्ण

मास्यां वा आधेय इति॥ ॥वसंतो ब्राह्मणोऽग्नीदधीत कामयेः॥ तस्माद्ब्राह्मणो वसं
त आदधीतेति वचनाद्ब्राह्मणस्य निःकामस्य वसंत ऋतुरग्न्याधेयस्य कालः॥ स
यः कामयेत ब्रह्मवर्चसी स्यामिति वसंते आदधीतेति ब्रह्मवर्चसकामस्यापि ब्राह्म
वर्चसी स्यामिति वसंते स आदधीतेति ब्रह्मवर्चसकामस्यापि ब्राह्मणस्यैव वसं
तः कालः। सतो ब्राह्मणस्यैवयुक्तं॥ ॥ग्रीष्मः क्षत्रियश्रीकामयोः॥ निष्काम
स्य क्षत्रियस्य श्रीकामस्य त्रैवर्णिकस्यापि ग्रीष्म ऋतुरग्न्याधेयकालः। तस्मा
त्क्षत्रियो ग्रीष्म आदधीतेति वचनात्॥ अथ यः कामयेत क्षत्रं श्रियायशसा स्या
मिति ग्रीष्म स आदधीतेति वचनात्। क्षत्रं श्रियेति वचनात्। अथ यः कायेत

Indira Gandhi National
Centre for the Arts

अक्षत्रियजातिरपिश्रियासंपदाकीर्त्याचदत्रात्मकःस्यामितिकामयमान
स्यब्राह्मणादेर्यीप्स आधानकालइत्यर्थः॥ ॥वर्षाःप्रजापशुकामवैश्यरथ
८८ कृतां॥प्रजाकामस्यपशुकामस्यचत्रैवर्णिकस्यवैश्यस्य निष्कामस्यापिर
थकृतश्चवर्षाऋतुरस्याधेयस्यकालोभवति।तस्माद्वैश्योवर्षास्वादधीतेति
निष्कामस्यापिवैश्यस्यवर्षाः।अथयःकामयेतबहुःप्रजयापशुभिःस्यामिति
वर्षासुमःआदधीतेतिमकामस्यत्रैवर्णिकस्यापि।वर्षासुरथकारआदधीते
तिरथकारस्यनिष्कामस्यापि।शारदांतुरशिशिरःसर्ववर्णानामिति।तथाच
।शिशिरःसार्ववर्णिकइतिच।शिशिरान्तेसर्ववर्णानामस्याधेयंभवतीत्युक्तं॥

८

एवंकालमुक्त्वाकर्त्तव्यमाह॥ ॥अभ्यागारेकुर्वंति॥आगारंगृहं।अभ्यागारे
गृहेअभ्यागारेहुअग्निगृहेत्यर्थात्परिमाणोअभ्यक्तत्वनिक्रमणात्कुर्वत्यध्वर्य्वाद
यः।ततश्चपूर्वंगार्हपत्यगृहंपश्चादाहवनीयगृहमित्यर्थः।अतएवकुर्वंति
तीतिबहुवचनादग्रेवत्वारऋत्विजःप्राश्नंतीत्युपदेशाच्चपूर्वमेवब्रह्मादय
श्चत्वारऋत्विजोवरणीयाः।अहर्तऋत्विक्कर्माणितेनकुर्यात्रकारयदि
तिसर्वसाधारणापनोपदिष्टत्वात्॥वेधवरणाभावेपित्वमे ब्रह्मात्वंमे
होतेत्यतंलौकिकंवरणमर्थात्कर्त्तव्यं।अन्यथाविशिष्टप्रत्यस्यसिद्धेः॥
इदम्[illegible]शंवापरं॥अपरंगार्हपत्यागारमुदवंशंवाकुर्यात्तवाप्राग्वंशं॥

Indira Gandhi National
Centre for the Arts

८८ आहवनीयागारं तु प्रवेशमेव कर्तव्यं॥ ॥दक्षिणापूर्वद्वारेऽत्यन्तिक्रमेण
अपरस्य दक्षिणां द्वारं कर्त्तव्ये आहवनीयागारस्य प्राच्यां द्वारं कर्त्तव्यं। ननु एके
क पाश्च्यं रस्य प्रत्येकं द्वारद्वयं किं न विधीयते। एवं गार्हपत्यागारे पूर्वद्वारं
वा स्यात्। न ह्यन्यथा गार्हपत्यादाहवनीयपर्यन्तं प्रागतिनयनविधाने गार्ह
पत्यावेक्षणां च संभवति। किंच। अल्पान्तरत्वात्पूर्वदक्षिणाद्वार इति निर्देशो
प्राप्नेय दक्षिणापूर्वे इति निर्दिशति। तदेवं ज्ञापयति प्रथमं गार्हपत्यागारं त
तत आहवनीयागारमिति। तथा वर्त्तितव्यं आनुपूर्व्येन संबंधार्थं अल्पान्तरत्व
मनादृत्यापि दाक्षिणाशब्दं पूर्वं निर्दिशति॥ ॥पौर्णमासवद्वपनं॥ अत्रयज

मानस्य पौर्णमासवत्केशश्मश्रुवपनं भवति॥ विकल्पमस्य वक्ष्यमाणत्वाद्धाति
ताः शिखस्यातिदेश इति केचित्॥ अपरे त्वेवमाहुः। पौर्णमासवद्वपनमि
त्येतेन न विकल्प इह किं तु नक्षत्रसंभारसामवपनं तत्र पुनर्वपनग्रहणा
देवं ज्ञायते पौर्णमासे नित्यमेव वपनं भवति न विकल्पेन। केशश्मश्रु वप
ते वा शिखमित्यत्र वा शब्दस्य शिखमित्येनेनैव संयोजनात्॥ शाखान्तर
न व निकृंतनमथाम्नातमस्ति। केशश्मश्रुवपनं न खानि निकृंतते ह्यात्यं वप
नं। केशवर्जमित्यापस्तंबः॥ ॥क्षौममवस्ते हृत। यजमानो ह तेअधीते म
कृत्यक्षालितं वा क्षौमवस्त्रपरिधत्तो ह्युमाश्र तमीत हि कार्पासं क्षौमं॥ पत्नी

Indira Gandhi National
Centre for the Arts

८३

त्वापञ्च पिअहृते स्तोमे वाससी वध्ने परिधत्ते ॥ स्तोमेवस्त्रावनीआदधी
यातामिति वचनात् ॥ ॥ स० स्थिते द्वर्यवेदये ॥ तेअहते स्तोमे आधाने संस्थि
ते भमासिंशाप्तेऽभाभ्यामपि अद्वयेवेदये दातव्ये । चरितार्थत्वाविशेषात्प
तिपत्तिमापेक्षत्वाविशेषाच्च ॥ ॥ गार्हपत्यागारे निर्मथ्याभ्यादधातीत्य
र्थात्क्षिप्रका[?]ष्ठाभ्यामग्निं निर्मथ्य गार्हपत्यागारे गार्हपत्यखरस्य मध्ये नि
दधाति अग्रेस्थानमुल्लिख्येत्युपदेशाच्च गार्हपत्यस्थापनस्थाने इत्याम्ना
ते ॥ ॥ वैश्यकुलाद्वरीषमहानसाद्वा । अग्निमाहृत्य गार्हपत्यागारेभ्याद
धाति ॥ इति शेषः ॥ वैश्यकुलादग्निमाहृत्य तत्र स्थापयति ॥ वैश्यगृहाच्च

लौकिकोग्निर्दुंतोऽस्त्रष्टो वा ग्राह्यः नत्वन्तस्परिगृहीतआवसथ्यादिः ।
। अथवा अंबरीषात् भ्राष्ट्रात् । कंदुगृहादित्यर्थः ॥ अथवा महानसा
त् । महानसशब्देन धान्यादिपाकार्थगृहमुच्यते यत्रानवरतबहुपाकवशा
द्दृष्टीतोग्निर्भवति । सर्वाग्निः पंचभूसंस्कारान्कृत्वा स्थापनीयः ॥ ॥ दिवा
श्नाति रात्रौ वा । अथ यजमानो दिवैव अश्नातीति नियोगतः । रात्रौ वा अश्नाति
नियोगतः रात्रौ वा अश्नाति अथवा रात्रौ नाश्नातीति रात्र्यशनस्यैव विकल्पः
न दिवाशनेन सह । यदहरस्य श्वोग्न्याधेयं स्यात् दिवैवाश्नीयादिति नियम
नदिवाशनं विधायनहि पिकाममेव नक्तमश्नीयादिति रात्र्यशनस्यैव छया

Indira Gandhi National
Centre for the Arts

विधानात्॥ ॥उपास्नमयंदेवाःपितरइति।उपास्नमयं अस्नमयसमीपकाले
९२ आहवनीयागारस्यपुरस्तादुपविष्टोयजमानोदेवाःपितरइतिमंत्रेणदेवा
न्पितॄंश्चाह्वयति।सयोहैवंविद्वान्देवाःपितरइतिह्वयत्याहास्यदेवादेवहू
यंगच्छंत्यापितरःपितृहूयमितिश्रुत्यास्यमंत्रस्याह्वानेविनियोगात्।पत्न्य
पितत्रदक्षिणतस्तिष्ठति॥ ॥पूर्वेणप्रविशति।ततोयजमानःपूर्वेणाह
वनीयागारद्वारेणाग्न्यगारयोःप्रविशति॥ ॥दक्षिणेनपत्नी।गार्हपत्यागा
रस्यदक्षिणेनद्वारेणपत्नीअगारेप्रविशति।प्रवेशनविधेर्विहितद्वारप
रत्वस्ययुक्तत्वात्॥ ॥पश्चादग्नेरुपविशतोदक्षिणतःपत्नी उक्तप्रकारे

श्राप

णगार्हपत्यागारंप्रविश्योभौपत्नीयजमानौस्थापितस्याग्नेः॰ पश्चादुपविश
तः।तयोर्मध्येपत्नीदक्षिणतउपविशतिअर्थाद्यजमानउत्तरतः॥ ॥अश्व
त्थशमीगर्भारणीप्रयच्छति।शमीमध्येउत्पन्नोश्वत्थःशमीगर्भइत्युच्यते।यो
ऽश्वत्थःतयास्थालीशमीतामिति श्रुतेः।शम्यागर्भःशमीगर्भः।अश्व
त्थश्चासौशमीगर्भश्चअश्वत्थशमीगर्भः।तन्निर्मितेद्वेअरणीअध्वर्युर्यजमाना
यप्रयच्छतिसमर्पयति॥ तल्लक्षणंचैवंशमीगर्भस्याश्वत्थस्यशाखास्तुस्याद
श्चुख्वावा॰ग्रहणंपापावाशाखायाः।छेदंकृत्वातन्मध्याअरणीकार्याते
चचतुर्विंशत्यंगुष्ठदीर्घेषडंगुष्ठविस्तारेचतुरंगुष्ठोच्छ्रायेभवतः।मानंचमध्य

Indira Gandhi National
Centre for the Arts

८२ मेनाग्रष्ठपर्वणाः कर्तव्यं। एवं विज्ञाएकाग्न्यरणिः द्वितीयाऽन्तरारणिरि
ति॥ ते चैते अरणी अग्निमंथनार्थं परिगृह्येते। त एव सर्वदा धार्ये। अत एवातिप
त्तिविधानात्। अरणिरूपणयो रिति। अत एव कात्यायनेनोक्तं। अरणिपा
र्ल्यमथ्यं गां यावन्निष्ठति पूर्वयोः। नतावत्पुनराधानमन्यारणिपार्विधीयत इति
॥ नाशन्दहनदाहादिनिमित्ते धन्ययोः परिग्रहोपदेशात्। अरणिपार्द्दग्धयोर्वा
पिनष्टयोः क्षीणयोस्तथा। आहृत्यान्यसमारोप्य पुनराधे वनिर्मथेत्॥ इति।
तथा च कात्यायनसूत्रः। अरणिपात्रनाशाग्निदाहेष्वग्निं समारोहितः पालयेद्
पशांतेस्मिन्पुनराधानमिष्यते। इति एवंच निमित्ताभावे परीगृहीतयोररण्यो



रात्मेच्छया तावत्परित्यागो यावत्कथमपि मंथनसंभवः॥ अभावे गर्भेस्व
शमीगर्भाश्वत्थाभावे अगर्भस्याप्यश्वत्थमात्रस्यारणी गृह्येते। तथाचोक्तं।
कात्यायनेन। अलाभेत्वशमीगर्भादुद्धरेदविलंवितइति॥ ॥वाचंयच्छापू
र्णाहुतेरित्याहाप्तमितनिशायां। अस्तमिते सूर्ये तदानीमेव निशायां य
जमानेषु तिअध्वर्युर्वा वंयच्छापूर्णाहुतेरिती मंप्रेषमाह। अस्तमितआ
दित्ये रात्रौ यजमानमाहेति शाखांतरेश्रवणादेवमुक्तं॥ ॥पर्युदयं वा
प्रधानकालत्वात्॥ वाशब्दः पक्षव्यावृत्तौ। उदयस्य समीपं पर्युदयं सा
मीप्येऽव्ययीभावः॥ सूर्योदयसमीपे वा रात्रावेव अस्मुपशमनानंतरवा

Indira Gandhi National Centre for the Arts

चंयच्छेतीमंप्रेषंयजमानेप्रतिब्रूयात्।अस्तमितमात्रेऽकृतएततावक्षानका
८३ लत्वात्।वाग्यमोहिपदार्थानांपदार्थानुष्ठानमुपशमय्यत्येवमाद
यानुष्ठानांगात्रोपर्युदयंविधीयते।अतोगानांप्रधानकालतान्याय्येति
न्यायाद्वाग्यमनस्यतदर्थविषयस्यचपर्युदयकालतैवचवदते।एवंवाग्यम
स्यदृष्टार्थताभवति।यतवाक्तेनहिपदार्थाःसुखेनकर्तुंशक्यंतेऽन्य
थाऽदृष्टार्थताभवेत्।तस्मात्पर्युदयमेवेत्यवधारणं॥यत्तुश्रूयतेऽ
स्तमितेआदित्येगन्त्राविति।तदुदयसमीपप्रक्रियमाणेनविरुध्यतेतदा
पिप्रागुदयाद्रात्रिरेवभवति।केचिद्वरवरसंस्कारानंतरंप्रागन्वानयन

प्रेषादिमप्रेष[illegible]मिच्छंति॥ ॥७॥गार्हपत्यागारेजंबध्नातिनवा।अरणि
प्रदानानंतरंगार्हपत्यागारेस्वकीयेपरकीयेवाअजंछागंवध्नाति।अथवा
नवध्नातीतिविकल्पः।तद्धैकेजमुपवध्नंतीतिविधायतदुतथानकुर्यादि
तिविहितप्रतिषिद्धत्वाद्विकल्पः।एतांरात्रिमजंबध्ना तीतिश्रवणादस्य
मयममकाल[illegible]मेवबंधनीयः।रात्रिमित्यत्यंतसंयोगद्वितीयायाः
श्रवणात्॥विद्यमानंप्रातरग्नीधेदद्यात्।विद्यमानंयजमानस्यगृहेष्वत्वे
न[illegible]विद्यमानमजंअवबंधनपक्षेऽपिसंस्थितकर्मण्यग्नीधेदद्यात्।संस्थि
तइतिचकारणूपावात्।कृतएतत्।तदुतथानकुर्यादितिबंधनपक्षे

षिध्यपद्यस्याज्ञः स्यादग्नीधएवैतंप्रातर्हविष्यान्नेनैवतंकाममाप्नोतितस्मा
दुतंनाद्रियेतत्यजवंधनकामस्यदानेनैवसंपद्यमानत्वेनाहेतुभूतेनाज
वंधननिराकरणात्। तस्माद्वंधनंस्तेहहविष्यमनस्यदाने। अत्रकेचिदे
वमाहुः यदिस्त्रीयाज्ञोनास्तितदावश्यंपरकीयाथानीयवंधनीयः यदि
गृहेस्त्रीयोज्ञोभवतितदावश्यंवेप्रातरग्नीध्रायदेयइति॥ अपरेत्वेवमा
चक्षते। स्वकीयःपरकीयोवाविकल्पेनवंधनीयः अत्रस्वकीयसंवंध
नपक्षेप्रातरग्नीधेदानं। नावंधनपक्षेनान्यवंधनपक्षइति॥ ॥अस्त
मितेरोहितेचर्मण्यानडुहेचत्वारिहविष्यपात्राणिमिमीतेतंचातुष्प्राश्यं

पचति। अस्तमितेसूर्येरोहितेरक्तत्वमापादितेआनडुहेवलीवर्दसंवंधिनिच
र्मणिउत्तरलोम्निप्राग्ग्रीवेअधिकरणभूतेचत्वारिहविष्यपात्राणिहविष्यस्य
तंडुलरूपस्यपात्राणिमिमीते। प्रक्षिपति। अत्रहविष्यशब्देनव्रीहितंडुलाए
वाच्यंतेनव्रीहयोयवाः कंडनस्यानुक्तत्वात्॥ अथचातुष्प्राश्यमोदनंपचेती
त्योदनश्रवणात्। तस्यचव्रीहितंडुलमिश्रान्नरूढत्वात्। पात्राणिचप्रसृतिच
परिमाणानि। ओदनस्यचतुर्णांप्राशनार्थत्वात्। प्राशनस्यःचतुरर्थत्वात्।
तत्रैवप्रसृतित्रयपरिमितंडुलौदनेनसंभाव्यमानत्वादिति॥ ॥तंचातुष्प्रा
श्यंपचति॥ तंचतुर्भिःपात्रैस्संमितैःप्रक्षिप्तंहविष्यंचातुष्प्राश्यंचतुर्णांप्राशना

Indira Gandhi National
Centre for the Arts

८५ ग्नेन्वाहार्यपचनेष्विति। आशनस्थः वोर्हेत सिजनन नसमर्थमोदनं तस्मिंगार्हपत्याग्नौ स्थापि
तस्येपचरितात्। तमिति मितमात्रस्यैव निर्देशः संस्कारान्तरशंकानिरासार्थः॥ त
ं सिद्धान्नेन तण्डुलानभिधाय प्रक्षाल्य पचेत्॥ ॥उद्वास्याभिघारणमध्ये कृत्वा सर्पि
रासिच्याभ्युक्ष्य त्रीन्समिधः समिधो घृताक्ता आदधातीति समिधाभि मितिपत्यवात
श्रृतमोदनं तस्मिन्नुद्वास्यत स्मोदनस्य मध्ये आसेचनं गर्त्तं कृत्वा तस्मिन्नात्रेऽ
सकृतमेव समभिघृतमासिच्य आभ्युक्ष्य त्रीन् प्रादेशमात्रान् इध्मान् समिधो घृता
क्ताः तेन गर्त्तेसिक्तेन वाज्येनाक्ता स्वस्मिन्नेव स्थापितेग्नौ आदधातीति समिधा
ग्निंदुवस्यत त्वा दिभिः प्रत्यृचं॥ ॥उपत्वेति जपति॥ उपत्वेतीमामृचं यजमा

नो जपति कुतः इत्यत्राह त्रे आहुर्युग्रह णात्॥ त्रिसमिदादान्यैकं जपतीति शाखान्त
तरश्रूयते॥ तेन क्रमाणा घृष्टि मिमित्रिः समिदाधाने चतुर्थं जपतीति॥ ॥द्वितीयां
वा ध्वर्युः अथवा नो पत्वेति जपति किंतु द्वितीयां तु समिद्वायतीमामृतं आध्वर्युर्वा
ति। स्वस्थानस्थितामेव एवं श्रूयते समिद्वती मिघृतवती मिऋग्यो पादवतीति
ति। स्वस्थानस्थितामेवं एवं श्रूयते समिद्वती मिघृतवतीमिश्रावाणं श्रूयते। द्वितीयायां व समिद्धा
समिद्धं हवती मिघृतथ हवती मिश्रावाणं श्रूयते। द्वितीयायां व समिद्धा
नास्ति॥ तेन नास्याः समिदाधाने विनियोगः। अत्र विप्रतिपत्तिः। केचिदंते द्विती
यां जपंति। केचित्स्वस्थानस्थितामेवेति॥ ॥चत्वारो ऋत्विजः प्राश्नंति। तमोदनं
चत्वार ऋत्विजो ब्रह्मप्रोत्रध्वर्युाग्नीध्राः प्राश्नंति॥ ॥राहुत्वे ब्रह्मौदनः स्याहा॥ ॥

९२

ब्रह्मौदनप्राशनानंतरं गृह्यसंग्रहे ब्रह्मौदन इति प्रथमं वर्षं यजमानं प्रत्याह ॥ ॥ वरं द
९६ दाति । तत एवमुक्तो यजमान ऋत्विग्भ्यो वरं ददाति । वरशब्देन संपादीयते । तद् अभि
लषितं गवादीनं वस्तु यथा संपत्रे हिरण्यादिकमुच्यते । न दत्त्वा चतुभ्यमपि ददाति वस्तु
णि प्रसृतत्वात् । अत एवाश्वादिवदर्थात् तत्र ब्राह्मणाः प्रवृत्तिसिद्धेः प्रवृत्तप्रवर्त
नार्थस्य ब्रह्मवरणस्य तन्त्रं हविः प्रभावः ॥ ॥ संवत्सरं वा पुरस्तात्कुर्यात् ततः सर्वा
नादधीत ॥ ॥ इदमन्यत्सूत्रांतरं । आधानस्य पुरस्तात् संवत्सरं मानादि वरदानां
तमोदनं प्रत्यहं कुर्यात् । ततः एवं विधात् संवत्सरं समिदाधानेन संस्कृतादग्नेः सकाशा
त् सर्वानग्नीन् गार्हपत्याहवनीयदक्षिणाग्निसभ्यावसथ्यानादधीत । होतुः संवत्सरं

व्रतचर्याशय्यमोदनं पचमन एतस्यैवाग्नेः स्थाने (स्व) अग्निः समिधो घृतेनाक्त्वा स
मिद्वतीभिर्घृतवतीभिर्ऋग्भिरभ्यादध्यात् । अस्यादध्यातो भिर्ज्जनितास एव समभिवि । ति
ष्ठात् । अस्मिंश्च पक्षे संवत्सरस्य प्रथमदिने अग्न्यागारकरणादिकम् यजमानक
र्त्तव्यं ॥ ततः पूर्णे संवत्सरे उत्तमे हनि वक्ष्यमाणः पदार्थो भवति । दिवा अशननिय
माजनं व्रतजागरणं वा वक्ष्यति । एतेषामाधानात्पू[illegible]होरात्र एव अवश्यं वा
त ॥ तथाहि । यदहरग्न्याधेयं स्यात् दिवा अशन्यादित्यशान्तनियमज्ञापये
नान् पूर्वदिने एव श्रूयते । तथा एतां रात्रिं जागरणं नास्ति व्रतजनं नास्ति पितस्यामवग
तो श्रूयते । अथ जागर्ति जागर्ति देवा इति प्रकृत्य समसदेव नरश्नीततरस्तपस्वितं

Indira Gandhi National Centre for the Arts

९१ तयोरग्नी आधत्त इति वचनस्यामेव रात्रौ जागरणं श्रूयते । कार्य्यमस्य च पदार्थयोग
त्वेन प्रधानकालत्वानुग्रहात् ॥ अस्मिन्पक्षे अग्निहोत्रकाले गार्हपत्यशमनेप्र
तिशायस्थित्रमाह ॥ ॥ गार्हपत्येत्वग्रामाग्निमाहृत्य चातुष्प्राश्यपक्त्वा विहरेत् ।
होमकाले गार्हपत्ये उपशान्ते ग्रामाग्निं लौकिकाग्निमाहृत्य तस्मिंश्चातुष्प्राश्यमो
दनं पक्त्वा चातुष्प्राश्यमिति शब्दसामर्थ्यात्तेन च॰तुरो ब्राह्मणान्भोजयित्वा च
तस्माद्दग्नेः अग्निहोत्रहोमार्थं विहरेत् ॥ चातुष्प्राश्यमित्यस्य गुणविधित्वेनना
मधेयत्वासंभवाच्चातुष्प्राश्यधर्मातिदेशः ॥ तेन मानादिवरदानान्तान्यत्र धर्मा
अत्र न भवंति । अतो यथाश्रुतमेव पचनं प्राशनं च भवति । ग्रामाग्निमित्यनेनो



द्धरणकालातिक्रमभयाल्लौकिकस्याहरणं विधीयते । मथ्यमानश्चेन्न जायेत
त्यादेवत ॥ तेन तद्वदेवदीप्यमानेतरेष्वप्येतैरेव [?] गार्हपत्यस्याहरणं । स्वयोनिभूत
स्यनाशादौ पुनरपि संवत्सरं चातुष्प्राश्यस्थेणा [?] पुनराधानमिति ॥ ॥ रात्रिं जा
गरणधारणा । सपत्नीकेन यजमानेन तस्यां रात्रौ जागरणमग्निधारणं कर्तव्य ।
नत्र धारणनियममाह ॥ ॥ शकलैर्वा । शकलैः काष्ठखंडैर्वा । सामर्थ्याज्जागमये [?]
पिंडे । वा स्थापितस्याग्नेर्हरणं कर्तव्यं । ननु वचनं विना यथैव मवप्राप्नोति । सत्यम
तरनियमार्थं पुनर्वचनमित्यदोषः ॥ ॥ व्युष्टायामुपशमय्य दक्षिणा वाम [?]
हरेदपन्वाहार्यपचनं ॥ व्युष्टायां रात्रौ तं गार्हपत्यागारस्थापितमग्निमुप

Indira Gandhi National
Centre for the Arts

रमप्यानुगमयित्वा वन्यमाणी कुर्यात्॥ अथवा तमग्निं दक्षिणासंहरेत्॥ ततः
९८ त्वा गृह्य दक्षिणस्यां दिश्यदूरे स्थापयेत्। परं यदि सोऽग्निः अन्वाहार्यपचनः कर्तुमि
ष्टो भवेत्॥ अस्मिन्पक्षे दक्षिणाग्निमादध्यात्। तस्मिन्काले तमेव दक्षिणासंहृ
तमग्निमाहृत्य दक्षिणाग्निरेव भवेदिति स्थापयेत्। न गार्हपत्यादाहृत्य॥ ॥
स्थानमुल्लिख्याभ्युक्ष्यान्वारब्धो हिरण्यं निधायोपर्याखूत्करान्निवपत्य तेषु शर्क
राः। तत उपशमितस्याग्नेः स्थाने भूप्रदेशं स्फ्येनोल्लिख्य यजमानेनान्वारब्धेऽदके
नाभ्युक्ष्य तत्र भूमौ हिरण्यशकलं निधाय तत्रैवामानं आखूत्करं च निवपति
ऊषशब्देन च क्षारमृत्तिका अभिधीयते॥ आखूत्करशब्देन चाखुभिरुत्कीर्णाः

पांसवोऽभिधीयन्ते। ऊषाखूत्करनिवापानन्तरं वैरूप्याखूत्करैररत्निमात्रक्षेत्रफ
लो वृत्ताकारः कर्तव्यः। ततस्तस्य खरस्यान्तेषु प्रीतेषु शर्कराः परितो निदध्या
त्। ताश्च पञ्चाशत्। पञ्चाशच्छर्करान्न्यसेदिति परिशिष्टोक्तेः। अत्र च प्रथममग्नि
स्थापनाङ्गभूताः पञ्च भूसंस्काराः पूर्वतरं कर्तव्याः॥ तत उल्लिख्य चान्वारब्धे य
जमानेऽभ्युक्षणादि शर्करानिधानान्तं कार्यं॥ ॥ हिरण्यमुपर्युक्तं। एके उप
रिष्टात्सर्वेषां संभाराणां हिरण्यनिधानमिच्छन्ति। एके पुरस्तादिति॥ ॥ एव
मितरयोः। इतरयोराहवनीयदक्षिणाग्न्योरेवमेव स्थाने कर्तव्ये। तत्राहव
नीयस्य स्थानमाह॥ पुरस्तादाहवनीयस्याष्टासु प्रक्रमेष्वेकादशसु द्वादश

Indira Gandhi National
Centre for the Arts

५५

सुप्रक्र[illegible] मत्या वा गार्हपत्यस्य खरस्य मध्या आग्नेयां दिश्यष्टासु पदिके
षु प्रक्रमेषु आहवनीयखरस्य मध्यं कुर्यात्। एकादशसुप्रक्रमेषु वा। द्वादश
सु प्रक्रमेषु वा। मत्या वाऽक्रमसंख्यातो न्यूनेष्वपि सप्तसु षडादिषु आहवनी
यस्य कुर्यात्। तेन वा अष्टासु विक्रमेष्वादधीत एकादशस्वादधीत द्वादशस्वा
दधीतेति। तथा नात्र मात्रा। स्त्रियत्र वह्निं यं मनसा मन्येत तत्र दधीत यद्वा अ
प्यल्पकमिव प्रांचमुद्धरतीति श्रवणात्। अत्राहवनीयस्य पंच भूसंस्कारान्
कृत्वा पुनरुल्लिख्यान्वारब्धे स्रुचा णादिशा कर्णनिधानं कुर्यात् अत्र उखा
खूत्कारैः। अरत्निमात्रश्चतुरस्रः खरः कार्यः। अंते षु त्रिसप्तति संख्याः शर्क
तं

रानिधेयाः पूर्वं दद्यात्त्रिसप्ततिरिति वचनात्।। खरप्रमाणं च यज्ञपार्श्वे तूक्तं।
अरत्निश्चतुरश्रः स्यात् पूर्वस्मादग्नेः खरो भवेत्। रथचक्राकृतिः पश्चाद्वेद्यार्द्धेन्दुव
द्दक्षिणा इति।। तिग्मेव। परिमंडलं गार्हपत्यस्याधिष्ण्यमरत्निमात्रं चतुरश्रमा
हवनीयस्यार्द्धचंद्रवद्दक्षिणाग्नेः सभ्यावसथ्ययोर्गार्हपत्यवदिति।। ।।
।।इतरस्य वितृतीये दक्षिणतः। इतरस्य दक्षिणाग्नेर्दक्षिणतो वितृतीयः
स्थानं। तस्य माधवनोपायः शुल्बकारणाकः। गार्हपत्याहवनीययोरंतरं ष
षड्भागसप्तधा वा गत्वा समं धाविभज्यापर वितृतीयलक्षणे दक्षिणायम्य
तस्मिन्निति रित्येकः प्रकारः। अपि वांतरविभागेन यारत्न्या पूर्वार्द्धे सम चतु

Indira Gandhi National Centre for the Arts

रत्नेकृत्वाश्नोस्थामनिरितिद्वितीयःप्रकारः।एवमन्यतरोपायेनस्थानंकृत्वा
ततःषोडशांगुलतानीमवृत्तंस्यात्षोडशांगुलं।तावदेवततोगत्वाहरेवृत्तमध्य
१०० र्यकेइत्यनेनोपायेनार्धचिक्षेत्रफलमर्द्धचंद्राकारंदक्षिणाग्नेःखरंकुर्यात्।
तत्राप्युपलेपनादिशर्करानिधानांतंपूर्ववत्।उपास्त्वकरेरर्द्धचंद्राकारःकार्यः।
ततांप्रांतेषुद्वाविंशतिःशर्करानिधेयाः।सभ्यावसथ्ययोर्गार्हपत्यवदाधा
नमितिपरिशिष्टोक्तेर्गार्हपत्यश्चखरवत्तस्यापिवृत्तःखरउपलेपनादिपंचा
शर्करानिधानांतैःसंस्कारैःकर्त्तव्यः॥ ॥उद्धृतेप्यग्निमंथनंसमयेगार्हप
त्यस्यमंथनमनुद्धृतेउदितसूर्येकर्त्तव्यं।यएवंविद्वाननुदितेमंथतीतिश्रुतेः॥

॥ ॥अनुद्धृतएको।एकेअनुद्धृतेअनुदितएवसूर्येमंथनंकर्त्तव्यमित्या
हुः॥ तद्धेकउदितेमथित्वेतिश्रुतेः॥ ॥उदितेहरणं।उद्धरणंतस्मादपवृत्ते
घुदितएवसूर्येकर्त्तव्यं॥ ॥तमुदितप्राञ्चमुद्धरंतीतिश्रुतेः॥ ॥उदि
तेनुहरणं [illegible] तीतिश्रुतेः॥ ॥अ
नश्चमंथनंभवतीतिसूत्रशेषः।गार्हपत्यायतनेअपरार्धगार्हपत्यखरस्यप
श्चात्प्रदेशेअहरहरग्निमंथनंकार्यं॥ ॥अश्वमानयेतिब्रूयात्॥अश्वमान
येतीमंप्रैषमध्वर्युराग्नीध्रंप्रतिब्रूयात्॥ ॥स्थितेश्वपुरस्तात्॥अश्वपुरस्ता
त्प्रत्यङ्मुखस्थितेमंथनंकुर्यात्।तत्रचप्रथममधरारणिमुत्तरारणिमुत्तरा

Indira Gandhi National Centre for the Arts

ग्रंनिधायउत्तरारण्याईशानदिग्भागादष्टांगुलदीर्घंद्व्यंगुलविपुलंप्रमंथंवि
२२ धातस्यमूलंचात्रबुध्नप्रवेश्यअधरारण्यामूलादष्टांगुलंत्यक्त्वाअग्राच्चद्वाद
शांगुलंत्यक्त्वातदंतरालेंगुलचतुष्टयपरिमितंपूर्वं॰वाप्यतेमंथनस्थानंकृ
त्वाचात्रबुध्नप्रोतस्यप्रमंथस्याग्रंतत्रनिधायचत्राग्रेकीलकाग्रस्योपर्युदग
ग्रामोवीलीनिधाययंत्रधारयित्वाचत्रनेत्रेणप्रदक्षिणंत्रिर्वेष्टयित्वातथा
मंथनंकुर्यात्यथाजातोग्निःप्राप्नोतीति।तत्रयजमानःप्राङ्मुखोयंत्रधा
रणंकरोति।पत्नीचत्रनेत्रेणत्रिर्वेष्टयित्वामंथनंकरोति।ततःशाखांतरा
दध्वर्युश्च।तस्मादध्वर्युःप्रत्यङ्मुखोभिमंथतीति।चत्रंचखादिरंद्वादशांगु

दीर्घंवर्तुलंअग्रेलोहकीलकयुक्तंबुध्नेप्रमंथाग्रप्रवेशयोग्यंगर्तयुक्तंमूलेऽग्रे
चलोहपट्टिकासंयुक्तंकार्यं।ओवीलीचखादिरीद्वादशांगुलदीर्घाचतुरंगुल
विपुलाअधोभागेसमाचत्राग्रस्थितकीलकोपरिस्थापनार्थंलोहपट्टिकायु
क्ताउपरिभागेवर्तुलाचकार्या।नेत्रंचगोवालशणसूत्रैस्त्रिवृद्व्याममात्रंका
र्यं।केचित्प्रमंथाग्रेणमंथंति।अपरेतुमूलेन।तत्रापिमंथमूलेनमंथनंकात्या
यनेनोक्तंषट्कारिकायांच।तद्यथाचत्रबुध्नेप्रमंथाग्रंगाढंकृत्वाविचक्षणः
कृत्वोत्तरारण्यामरणिंतद्ध्वमुपरिन्यसेदिति॥ ॥ज्ञातेवरदानं।ज्ञातेऽध्व
र्यवेवरदानंयजमानःकरोति॥वरशब्देनअश्वयोरभिलषितंयजमा

Indira Gandhi National
Centre for the Arts

१०२

स्य स्वाधीनं च न हिरण्यादि इत्युच्यते॥ ॥मनमेकेणकेइदानीं अहमिदं
वस्तु अद्य धेवेदास्यामीति मनसा संकल्प्य पश्चात्कर्म समाप्यते तत्र ददाति इत्
दानीं॥ ॥तद्या मिश्वासः प्राणमभृतेद सइति। तस्य जातस्याग्नेर्यजमानेनाभि
श्वासः कार्यः॥ प्राणममृतं दधइति मंत्रेण। अभिश्वासश्चाग्निमभिलक्षीकृ
त्य मुखेन श्वासस्य प्रेरणं। फूत्कारकरणमित्यर्थः॥ ॥उछ्वासो मृतं प्राणः आ
दधइति। उछ्वासो वह्निज्वालाया उर्ध्वं श्वासेन मुखमध्ये ग्रहणं। अमृतं प्रा
णः आ दधइति मंत्रेण यजमानेनैव कर्त्तव्यो। मपुनरन्ये नेति निजवचनात्॥
तदेनमंतरात्मन्याधत्ते इति श्रुतेः आत्मसंस्कारकत्वमुछ्वासस्य प्रतीयते। त

नास्य यजमानकर्तृकत्वं। तत्रैनमदो मंथंतितज्ज्ञातमभिप्राणितिसपुनरपा
नीत्यत्र स पुनरित्यनेन तछब्देनाभिश्वासकर्त्तुरेवापान। न क्रियाविधीयते। अपा
न क्रियायाश्च यजमानकर्तृकत्वाप्राणनमपि यजमानस्यैवेत्तु भयंयजमान
कर्तृकं सिद्धं। तज्ज्ञातमभिप्राणिति। अभिश्वासस्य जातसंयोगात्तकः सर्वोनादी
पीतत्व स्मिन्नपक्षेन भवति। उछ्वासस्तु भवत्येवात्मसंस्कारात्॥ ॥ दारुभिर्वृ
द्धं तमादधाति भूर्भुवइति संभारेष्वमुष्टत्वांउते नादधइति यथर्षि। तं जातमभि
दारुभिर्वृक्षियवृक्षकाष्ठैर्ज्वलिंतं देदीप्यमानं संभारेषु संभाराणां हिरण्या
दीनामुपरि स्थापयति। भूर्भुवइति मंत्रेण। अमुष्यत्वाव्रतपतइति मंत्रेणवा।

व्रतपते

Indira Gandhi National
Centre for the Arts

यथार्षीतियस्ययंऋषिमेवेतितस्यासुष्येतिस्थानेतदृषिवाचिपदंषष्ठ्यंतंप्रयो
ज्यं॥तद्यथा।अंगिरसांत्वादेवानामित्यंगिरसांभृगूणांत्वादेवानामितिभार्ग
८३ वाणां।भार्गवांगिरसव्यतिरिक्तानांसर्वेषामादित्यानांत्वादेवानामित्येवएं
वेहिशाखांतरेपठ्यंते।तथाचापस्तंबः॥ ॥भृगूणांत्वादेवानांव्रतपतेव्रते
नादधेइतियोभार्गवस्तस्यादंगिरसांत्वादेवानांव्रतपतेव्रतेनादधामीतियोब्राह्म
णोंगिरसःस्यादादित्यानांत्वादेवानांव्रतपतेव्रतेनादधामीत्यासांप्रजा
नां।वरुणस्यत्वाराज्ञोव्रतपतेव्रतेनादधामीतिराजन्यइंद्रस्यत्वेंद्रियेणव्रतप
तेव्रतेनादधामीतिराजन्यस्यमनोष्ट्वाग्रामण्योव्रतपतेनादधामीतिवैश्या

नामादित्यानांत्वेतिरथकारस्येतियथार्थोधानामीति॥ ॥वरुणस्यत्वेतिक्ष
त्रियस्य।क्षत्रियजातियजमानस्यअमुष्य त्वदत्यस्थानेवरुणस्यत्वाराज्ञोव्र
तपतइतिमंत्रेणादधाति॥ ॥इंद्रस्येतिराजन्यस्य।राजन्यस्याभिषिक्तराज्ञो
पत्यस्ययजमानस्यामुष्येतिस्थानेइंद्रस्यत्वेंद्रियेणव्रतपतइतिमंत्रेणाभिमा
दधातिमंत्रेणाभिमादधाति॥ ॥मनोष्ट्वाग्रामण्य इतिवैश्य स्य।वैश्यस्य
यजमानस्यामुष्येतिस्थानेमनोष्ट्वाग्रामण्योव्रतपतन्याभिमादधाति॥ ॥स्व
भूः णांत्वेतिरथकृतः माहिष्यणांजारेषातोरथकृत॥इतिकेचित्॥स्व
भूमौधन्वनमात्वतापरपरंशोभान्नेदर्शिकेन्योदीनोनियतःकश्चिज्जातिवि

Indira Gandhi National
Centre for the Arts

शेषइति पार्थे सारथि मिश्राः। तस्य रथक्रतो यजमानस्य अमुष्येति स्थाने अभू
२०४ मो त्वा देवानामिति मंत्रेणाभिमन्त्रयति॥ ॥रथन्तरं गायेति प्रेष्यति। तती
रथन्तरं गायेति प्रैषः। तत्र प्रैषार्थयोः कर्तृभेदात् ज्ञायते कः प्रेषकः को वा प्रैषार्थ इत्य
त आह॥ ॥गानमध्वर्योः। अध्वर्योर्गानं साम गानमध्वर्योः स्यात्। कुतः। समाख्या
नात्। यतो ध्वर्युवेदे सामगानं विहितं। सामवेदस्तु उत्पत्तिमात्रं प्रैषार्थ प्रधा
नत्वात् तत्त्वाच्चैव प्राप्ते आह॥ ब्रह्मा वा वेदयोगात्॥ वाशब्दः पूर्वोक्तपक्षनिरासा
र्थः॥ ब्रह्मैवात्र सामानि गायति नाध्वर्युः। कुतः। वेदयोगात्। वेदेन योगो वेदयो
गः। ब्रह्मा सामवेदेन योगो विग्रहणाधारणरूपेण। यत्र वेदस्य ब्रह्मत्वे अधिका

रः॥ अतः स एव सामगाने अधिक्रियते॥ ॥युक्त्वा छ्वाध्वर्योः। अध्वर्योः पदा
श्वान्तरं प्रयुक्तत्वाच्च ब्रह्मैव गायति। अत एव सूत्रान्तरं॥ ब्रह्मा ता परि सामानि गा
यति॥ अथ यद्य सोत्राम गाणां च ब्रह्मणेति॥ ॥इदानीं हुत्रामुपयम्य। अष्टा
दशांशपरिमितं द्वाणामित्युक्तत्वादपरिमितं प्रणायनीयं त्रिंशन्मित्युक्तत्वा
च्च पालाशवैकंकतादियाज्ञियवृक्षसंबन्धि सप्तविंशतिकाष्ठप्रभृत्यपरिमि
तकाष्ठकेन त्रिगुणवद्धेनेध्मेन गार्हपत्ये प्रदीप्तेनाहवनीयस्योद्धरणं कर
ण। किं कृत्वा॥ उपयम्य॥ उपयमनीर्मृत्तिकाभिः क्लिवत्यात्रस्थाभिः प्रदी
प्तस्येध्मस्याधस्तादुपर्यधहीत्वातं प्रदीप्तमिध्मं मृत्तिकासहितं परे निधा

नेकु२

Indira Gandhi National Centre for the Arts

येत्यर्थः। अग्रेऽस्मत्पूर्वाह्णे अग्रहणाद्विधानादत्रमूल्यस्मादीपनं कार्यं॥ ॥यथैनं धूमउपेयात्। तथाऽस्मेनोद्धरणं कर्त्तव्यं यथा धूम एनं यजमानमुपयात्॥
९९ उपगच्छेत्। अनेनप्रकारेण यजमानो धूममनुगच्छेदिति विधीयते। अथवात्रा-
यमर्थः॥ उद्धननादिना तथा यत्नः कर्त्तव्यो यथा धूमो यजमानं प्राप्नोतीति। तं वै तथैव हरेयुर्यथैनमेषप्रत्यङ्ङुत्याचरेदेषा वै यज्ञो यदग्निः प्रत्यहैवैनं यज्ञः प्रविशती-
ति। एनं यजमानं एषोऽग्निः प्रत्यङ्ङभ्युपगच्छेत्॥ यां दिशं धूमो याति तस्यां
दिशि स्थितो यजमानोऽग्निना सहाहवनीयदेशं गच्छेदित्यर्थः॥ ॥वामदेव्य-
मिति प्रेष्यति षदीं नमिधाप्य ...थवन्वामदेव्यं गायति ब्रह्मणा अध्वर्युः प्रेष्य १०५

ति॥०अश्वः पुरस्तादूवाद भावेयुर्वाश्वाभावेऽनड्वान्। उद्धरणे क्रियमाणे ... अश्वः अ-
ग्नेः पुरस्तादग्रतो याति। नयत्र प्राचं हरन्ति तत्पुरस्तादश्वं नयन्तीति श्रुतत्वात्। की-
दृशोऽश्वः युवा तरुणः स वै पूर्ववा दिति श्रुतेः। तस्याभावेऽश्वस्याभावे अयुवा
अतरुणोऽपि। यदि पूर्ववाहं न विदेपि य एव कश्चाश्वः स्यादिति य एव कश्चाश्वः स्या-
दिति श्रुतेः। यद्यश्वो न संपद्यते तत्स्थानेऽनड्वान्बलीवर्द्दोऽप्यग्रतो नीयते। यद्यश्वं न विंदे-
दप्यनड्वानेव स्यादिति श्रुतेः। मंथनकाले च आहृतोऽश्वः स एवात्रापि प्रकृतत्वा-
त्। तेनैव मंथनकाल एव तत्प्रस्तरयं॥ तदा चानुद्धृत्य प्रेतेऽश्वमानयेति प्रेषाभावात्।
अनभिधानात्। नवोढः प्रकृतित्वादिति॥८॥ संभारानभिपिष्ठाप्य दक्षिणा पूर्वमादे

Indira Gandhi National
Centre for the Arts

श्री२

नप्राचीनं त्वावर्त्य स्थापयति। एवं प्राङ्मुखं अश्वं अग्नेः नीयमाने आहवनीयखर समीपं
प्राप्य प्राङ्मुखस्यैव अश्वस्य दक्षिणपूर्वपादेन अभिमद्दक्षिणचरणेन आहवनीयखरस्था
२०६ न दक्षिणपादिसभागेन विन्यस्य अश्वपादेनाक्रम्य तमश्वं प्राचीनं त्वा तत आवर्त्य प
दक्षिणावर्त्तेन प्रत्यङ्मुखं कृत्वा संमुखं स्थापयति। अथ अश्वमाक्रमयति तमाक्रम
दक्षिणमप्राचमुत्रयति पुनरावर्त्तयतीति श्रुतेः अत्र दिङ्नरतो अश्वस्यनीयमानत्वा दक्षिण
नपादेनाक्रमणमुक्तं। अत एवोखासंभरणे अश्वस्य दक्षिणेन नीयमानत्वात् अग्निमः। ९
सव्यपादः संनिहितः इति सव्येनैव पिंडस्याक्रमणं कर्त्तव्यं॥ ॥ इह दिति प्रेष्यति॥ ॥
अश्वं प्रत्यङ्मुखमेव स्थाप्याध्वर्युः इद्ध्मायतिब्रह्माणं प्रेष्यति॥ ॥ अग्निनापदं द्विरु २०६
पस्पृश्य तृतीयेनादधाति द्वितीयेन प्रथमेन वा भूर्भुवः स्वरिति पूर्ववत्। इध्मस्थेनाः

ग्निनाखरमध्ये संभारस्योपरिकृतमश्वस्य पदं पदमुद्गोहित रूपस्पृश्यमहिर्विरंस्
ष्ट्वा तृतीयेनोपस्पृशन्निन सहतमग्नि तत्र अश्वपदे आदधाति स्थापयति भूर्भु
वः स्वरिति मन्त्रेण पूर्ववत्। तमश्वस्य पदमाभजेत् इति पक्षः सर्वे तूष्णीमेवा
यउपस्पृशन्त्यथो यच्छ त्वथोपस्पृशति भुर्भुवः स्वरित्येवतृतीयेनादधातीति
श्रुतेः। अथवा अग्निनापदं सकृदुपस्पृश्य द्वितीयेनोपशमशान्तिनसहाग्निमादधा
ति। अथेदं द्वितीयं तूष्णीमेवा यउपस्पृशन्त्यथोच्च निभुर्भुवः स्वरित्येवा द्वितीये
नादधातीति श्रुतेः। अथवा प्रथमा नैवोपस्पर्शनेन सहाग्निमादधाति प्रथमे
नैवोपस्पृश्य आदध्यादिति श्रुतेः। पूर्ववदित्यमुष्य त्वाव्रतपत इति यथा ति वलभ्य

Indira Gandhi National
Centre for the Arts

ते॥ पुरस्तात्परिक्रम्य अपूर्वां ईं गृहीत्वा घै। शिवभूम्नेत्याह। ततः स्थापनानंतरंय
जमानोऽग्नेः पुरस्तात्परिक्रम्याग्नस्य पूर्वा ईं गृहीत्वा इध्मास्यो य भागं हस्तेनालभ्या
१७ दाय घै। शिवभूम्नेत्यमुं मंत्रमाह॥ जपति। अथ पुरस्तात्परीत्य पूर्वार्द्धं मुल्मुकाना
मभिपद्य जपति चेरिवि स्यादिक्षते: इध्मापूर्वार्द्धीन्यारंभणा इत्यन्वारंभस्या
कृत्वादन्वारंभस्य च यजमानत्वादत्रापि यजमानस्य कर्तृत्वं। मंत्रलिंगाच्च।
अग्निमन्त्रदिमत्रा घासादवशति॥ आयं गौरिति चोपतिष्ठते सार्प्पराज्ञीभिः च
शद्वाय तमान एवायं गौः प्र[illegible] श्नि रित्याद्याभिस्तिसृभिः सार्प्पराज्ञीभिः। सर्प्प
राज्ञा दृष्टाभिरग्निराहवनीयमुपतिष्ठते। सार्प्पराज्ञीत्या साम्नेवा संसवदह १७

रार्था। सार्प्पराज्ञीर्नवाकुर्यान्निसृष्ठ्यपराह्ने सार्प्पराज्ञीष्ठित्या दौ दक्षिणाग्निमाद
धाति। गार्हपत्यादग्रेरेकदेशमादाय दोरुभिह्वलेन दक्षिणाग्रिखरे स्थापयति
अत्र शाखांतरादुवः। अमुष्य त्वेति च भावति। तथा चापस्तंबः। लौकिकमग्निमा
हृत्य माथित्वा वा द्वितीययाग्याहृत्य दक्षिणाग्निमादधातीति। यदि च गार्ह
पत्यागारे पूर्वदिने स्थापितोग्निर्दक्षिणाग्निः संहतो भवति। अन्वाहार्यपचनोऽयं
करिष्यतः इमिबुध्यात दात मेवानीयाधुनाऽधुव इत्यादिना दक्षिणाग्निखरे
स्थापयति। दुक्तं। दक्षिणाग्नावसंहरेदन्वाहार्यपचनश्चेति। अस्मिन्पक्षे यावज्जी
वं स एव नित्यो दक्षिणाग्निः सर्वदा धार्यते। अस्तंगतस्थानादिष्ठ पूर्वं स्थापोने

Indira Gandhi National Centre for the Arts

गाह्रियते। वैतानसूत्रेपठ्यते। दक्षिणाग्निनिर्मथ्य आहार्यो वा सभ्यावसथ्ययोराहवनीयाद्विहारः सभ्याद्वावसथ्यस्येति। सभ्यं वा निर्मथ्य। ततो गार्हपत्यवदेवस

१८ भ्यसंज्ञमग्निं निर्मथ्यैवकारादादध्यात्। सभायां स्थापयति। सभायां भवः सभ्य

इत्यर्थानुगमात्। अथ्यय एष सभायामग्निरिति वचनात्॥ ब्रह्मणोऽपि यत्रोप

विश्यासिष्ठात्। पावयति। सा तस्य समेत्युच्यते। सभ्यस्थापने गार्हपत्यवद्भु

वः इत्यमुष्यत्वे इति मंत्रेणैव भवति। सभ्यावसथ्ययोर्गार्हपत्यवदाधानमिति

परिशिष्टोक्तेः। गांदीर्घमित्याह॥ सभ्यास्थापनानन्तरं यजमानस्त्विजः॥

प्रतिगांदीर्घमिति प्रैषमाहादिवुक्रीडायां तेन हेत्त्विजः सूर्पगां पणं कृत्वा १८

